# कालिदासकाव्यसौरभम्



रचयिता :

विद्वान् खंडविल्लि सूर्यनारायणशास्त्री.

(सर्वे अधिकाराः रचयित्रा स्वायत्तीकृताः)

# कालिदासकाव्यसौरभम्



रचयिता

विद्वान् खडविल्लि सूर्यनारायणशास्त्री.

(सर्वे अधिकाराः रचयित्रा स्वायत्तीकृताः)

# मदीया विज्ञप्तिः

पाठकोत्तमेभ्यः प्रणामसमर्पणपूर्वकं निवेद्यते ।

कविकुलगुरोः कमनीयकाव्यवाङ्मयेन विशिष्य, विश्वश्रेय-स्संपादकेन, अत एव अमृतकल्पेन आत्मसात्कृतोऽहं मदीयाऽल्पज्ञता-मपश्यन् काव्यविमर्शायाऽस्मै प्रवृत्तः ।

कार्यान्तरव्यापृतेन अल्पज्ञेन च मया अवकाशसमयेषु खंडशः लिखितेस्मिन् व्यासगुच्छे विविधाः लोपाः भवेयुः । सूचितांस्तान् सादरं स्वीकरिष्यामीति विज्ञापयामि ।

एतत्पुस्तकप्रेषणसमनंतरमेव स्वीयोदारोत्तमाशयाननुगृह्णद्भ्यः श्री शृंगगिरि शारदापीठाऽध्यक्षेभ्यः श्री श्री श्री जगद्गुरुचरणेभ्यः, एवं "वेदभाष्याऽलङ्कारा"दि विशिष्टबिरुदांकितेभ्यः वेदमयेभ्यः ब्रह्मश्री उप्पुलूरि गणपतिशास्त्रिमहाभागेभ्यः, प्रधानाचार्य श्री भाईशंकरपुरोहित-मतेभ्यः, श्री सिहेंचि. मार्कण्डेयशास्त्रिमहोदयेभ्यः (M. A., Sanskrit, Deputy Director for Oriental Studies Andhra State), ब्रह्मश्री सूरि रामकोटिशास्त्रिमहाशयेभ्यः सहृदय-शिरोमणिभ्यः (Principal K. L. N. Sanskrit College, Tenali) एतत्सर्वेभ्यः पण्डितवरिष्ठेभ्यः भक्तिभरितां मदीयप्रणाम सहस्रीं सर्वदा समर्पयामि ।

एतद्ग्रन्थमुद्रणकार्ये सश्रद्धं बद्धकटिभ्यः श्री विजयलक्ष्मी शक्ति (पवर्) मुद्रणालयाधिकारिभ्यः श्री बुलुसु वीरभद्रमहोदयप्रभृतिभ्यः, श्री चिलुकूरि रामभद्रशास्त्रिभ्यश्च धन्यवादान् प्रकटयामि ।

मदीय एषोऽल्पपरिश्रमः, संस्कृतभाषाऽध्येतृभ्यः तदध्यापयितृ-भ्यश्च रोचत एवेति विश्वसिमि । एवं निवेदयिता

**रचयिता ।**

## कृतिसमर्पणम्

"यो ब्रह्मविद् ब्रह्मविदां वरेण्यः
श्रौतक्रियानिर्वहणेऽतिदक्षः ।
वेदप्रचारे विनियुक्तकालः
नमांसि तत्सद्गुरवेऽर्पयामि ॥"

"मदीयं कालिदासीयं शुभदं काव्यसौरभम् ।
अर्पयाम्यद्य हर्षात्सद्गुरवे प्रभविष्णवे ॥"



కృతికర్త యొక్క వేదసురుపులు.

# श्री जगद्गुरु महासंस्थानं, शारदापीठम्

श्रृङ्गेरी - कडूर (मैसूर स्टेट्)

**Vidwan K. Padmanabha Upadhyaya**

*Personal Assistant*

To His Holiness The Jagadguru

Sri Shankaracharya of Sringeri Mutt

*Camp*- शृंगगिरिः

*Date 22-12-72*

*Ref. No. 1056/72*

वे. ब्रह्मश्री खण्डविलि सूर्यनारायणशास्त्रिषु सादरा विज्ञप्तिः। भवत्प्रहितं कालिदासकाव्यसौरभाख्यं ग्रन्थं श्रीजगद्गुरुचरणा अवालुलुकन्। संस्कृतवाङ्मये कविकुलगुरोः कालिदासस्य विशिष्टं स्थानमस्तीति न तिरोहितं समेषां लोकानाम्। कालिदासीयकाव्यान्यनधीत्य न कोपि विद्वत्पदभाजनं भवतीत्येतावदेव तन्महत्वाऽऽवेदनायालम्। निघृष्यमाणे चन्दनखण्डे यथा परिमलः समुज्जृम्भते तथा विमृश्यमानेषु कालिदासकाव्येष्वपि स्वारस्यानि दरीदृश्यन्त एव।

भवन्तः अदसीयानि काव्यानि सम्यग्विमृश्य तद्गतानभिनवान् विषयान् संगृह्य अस्मिन् ग्रन्थे सरलया संस्कृतवाण्या समयोजयन्निति विदित्वा श्रीचरणा नितरां प्रसीदन्ति। आशासते चायं ग्रन्थः जिज्ञासुजनपाणिपल्लवालंकृतिर्भूयादिति।

इति निवेदयिता

के० पद्मनाभोपाध्यायः

'वेदभाष्यालङ्कारादि' बिरुदांकितानाम्

## श्री उप्पुलूरि गणपतिशास्त्रिमहोदयानाम्

## अभिप्रायः

तत्र भवद्भिः श्री खण्डविल्लि सूर्यनारायणशास्त्रिवरेण्यैः संप्रेषितं "कालिदासकाव्यसौरभ"नामकं ग्रन्थराजं शिष्यमुखादश्रौषम् ।

लोके सर्वेऽपि शास्त्रनिष्णाताः विद्वांसः प्रप्रथमं रघुवंशप्रभृति कालिदासीयकाव्यजातं अधीत्यैव शास्त्रनिष्णातताम्वापुः, आप्नुवन्तीति च आनुभविकमेव एतत् । परन्तु एतद्विद्वन्मण्डले नैकोपि इत्थं तत्रत्यैतादृशसारग्राही अद्ययावत् श्रुतिपथं अवातीतरत् । अतः एतदीयकाव्यसौरभाऽऽघ्राणवेलायां अयं श्लोकः स्मृतिपथमगात् ।

"देवीं वाचमुपासते हि बहवः सारन्तु सारस्वतं
जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारिः कविः ।
अब्धिर्लङ्घित एव वानरभटैः किन्त्वस्य गम्भीरतां
आपातालनिमग्नपीवरतनुः जानाति मन्थाचलः ॥"

तथाहि "कालिदासीयकाव्यजातक्षीरोदं मन्थाचलवत् निश्शेषमुन्मथ्य, ततः ऐहिकामुष्मिकपुरुषार्थाऽभिव्यंजकवाक्यनिकुंजनवनीतं समुद्धृत्य, पुंजीकृत्य च लोकसात्कुर्वाणानां एतेषां पाण्डित्यचातुरी मुरारिकविवत् असाधारण्यं भजत इत्यत्र न किंचिदप्यतिशयोक्तिमुत्पश्यामः ।

सर्वोऽपि विद्वल्लोकः पूर्वोक्तदिशा वानरभटवत् कालिदासीयग्रन्थनिकरं अध्यैष्टैव । परन्तु तत्रत्यविषयजातं ऐहिकाऽऽमुष्मिकपुरुषार्थाऽभिव्यंजकतया विविच्य सारग्राही नैकोऽपि स्मृतिपथं नागमदिति, प्रकृतकवेः मुरारितौल्यं नाऽतिशयोक्तिमावहति ।

किंच उक्तविधया कालिदासीयग्रन्थकदम्बस्य एतादृशनिगूढ-भावगर्भितत्वादेव --

"पुरा कवीनां गणनाप्रसंगे कनिष्ठिकाऽधिष्ठितकालिदासा"

इत्यभियुक्तोक्तिः प्रववृते, इत्यपि स्फुरति ।

प्रकृते च संस्कृतभाषाध्येतारः कालिदासीयग्रन्थाऽध्ययना-ऽनन्तरं अवश्यमेतत्काव्यसौरभमास्वाद्य, विज्ञातकालिदासीयग्रन्थ-निगूढभावास्सन्तः

"काव्यम् यशसेऽर्थकृते ... ... "

इत्याद्यालङ्कारिकवचनोक्तफलान्यवश्यमाप्नुयुः ।

अतः उक्तदिशा पाठकानां महोपकारकं प्रकृतग्रन्थराज सर्वकलाशालासु संस्कृतकक्ष्यासु पाठ्यग्रन्थतया निवेश्य, पाठकान् सुनिश्चितकाव्यसारग्राहिणः कृत्वा विद्याशाखाधिकारिणः एतत् ग्रन्थ-निर्मातृकविशेखरश्रमं सफलीकरिष्यन्तीति मन्यामहे ।

एतादृशमभूतपूर्वम्, महाकवि कालिदासविरचित सर्वग्रन्थ-निगूढतत्त्वाभिव्यंजकं काव्यसौरभं वितन्वानं शास्त्रिवर्यं परमेश्वरः पायात् ।

अयं च ग्रन्थराजः सर्वविद्वज्जनप्रस्तूयमानः अनवरतमाचन्द्र-तारार्कं स्वसौरभेण अध्येतृमनांसि प्रीणयत्वित्याशास्महे ।

इत्थम्

उप्पुलूरि गणपतिशास्त्री,

'वेदभाष्यालङ्कार' 'वेदभाष्यविशारद'

इत्यादि बिरुदांकितः ।

२३--१--७३

ध्वनि : 351461 तार : भाविद्या (जी. जी.)

# भारतीयविद्याभवन

(संस्कृत-परीक्षा-विभाग)

दिनांक : 22-1-73

चौपटी पथ, बम्बई ७

मान्याः परमसुहृदः श्री के. सूर्यनारायणशास्त्रिणः नमांसि ।

श्रीमद्भिः प्रहितम् "कालिदासकाव्यसौरभम्" इति पुस्तकमलाभि । पुनश्च तदमंदानन्दोऽजनि । कालिदासकृतिषु उपलभ्यमानानां विविधानां विषयाणां मार्मिका उक्तयोऽत्र संग्रहे संगृहीताः । तस्य पूर्वापरसंबन्धप्रदर्शनपुरस्सरं चेतश्चुम्बि निरूपणं, नूनं परमाह्लादाय भवति प्रज्ञावताम् । सूक्तिसंचयः लेखकस्य सहृदयत्वं, सुपरीक्षकत्वं च आवेदयति । सौरभकर्तुः स्वोपज्ञानि वाक्यानि स्पष्टार्थानि, ललितभाषागुम्फितानि च भवन्ति । सौरभस्यतादृशस्य पठनं, संस्कृतविद्यार्थिनां प्रमोदाय चेतःप्रसादाय च भविष्यतीति निश्चिनोमि । अस्य प्रस्तमरं प्रकाशं प्रसारं च कामये ।"

इत्थम्

भावत्कः

**भाईशंकरपुरोहितः**

प्रधानाचार्य

मुंबादेवी संस्कृत महाविद्यालय

भारतीयविद्याभवन्, बंबई - 7

——

**Dr. C. Markandeya Sastry,**
M. A., Ph. D., B. Ed.
Dy. Director of Public Instruction
(Oriental Studies)

Hyderabad,
3—2—73.

कालिदासकृतीनधिकृत्य बहवः विमर्शग्रन्थाः सर्वासु भाषासु-रचिताः प्रकटिताश्च । किन्तु संस्कृतभाषायां ते अल्पाल्पाः । आद्यतनीं विमर्शपद्धतिमनुसृत्य तस्य महाकवेः अनल्पां बहुमुखां प्रज्ञां विशदीकर्तुं एतादृशानां ग्रन्थानामांग्लभाषानभिज्ञानां संस्कृतभाषा-निष्णातृणां च कृते महती आवश्यकता अस्त्येव । श्रीमन्तः खडविल्लि सूर्यनारायणशास्त्रिणः तथाच एतन्महाकवेः काव्यसौरभं पंडितानां विज्ञाननासिकाभिराघ्रापितवन्तः नवीनेन मार्गेण । श्री शास्त्रिभिः अन्ये विमर्शग्रन्थाः ये आन्ध्रभाषायां रचिताः प्रकटीकृताश्च, गीर्वाण-भाषायामपि प्रकाशं नीयन्ते सत्वरमिति संस्कृतज्ञा आशंसन्ते ।

चि. मा. शास्त्री ।
3—2—73.

*Sri S. Ramakoti Sastry,*
PRINCIPAL.
MEMBER OF ACADEMIC COUNCIL.
ANDHRA UNIVERSITY.

Date 14–3–73

To

Ref : श्री कालिदासकाव्यसौरभम्

Sub : अधिकृत्य आशयः

Sir,

तत्र भवद्भिः श्री खंडविल्लि सूर्यनारायणशास्त्रिभिः कुशाग्रीय-धिषणैः प्रसारितं "कालिदासकाव्यसौरभम्" समाघ्रातम् । अत्र विमर्शसरणिः मनोज्ञभावसङ्कलिता सहृदयमनांसि आवर्जयति । कालिदासकवितायां सौन्दर्येण साकं धर्मस्य तत्त्वस्य च अनुप्रवेश-माविष्कुर्वन्त एते भारतीयविद्यावैभवमुद्घोषयन्तीति मोमुद्यते चेतः । वर्धिष्णूनां श्री सूर्यनारायणशास्त्रिणां लेखनी इतोधिकं साहितीरङ्गे प्रसृता भारतीयसंस्कृतिं प्रचिनुतात् ।

इति निवेदयति
सूरि रामकोटिशास्त्री
सुधीविधेयः

K. L. N. Sanskrit College,
TENALI.

मोहर्

श्रीः

श्रीमत्परमहंस परिव्राजकाचार्यवर्य, श्रीमच्छंकरभगवत्पादप्रतिष्ठित, श्री काञ्ची कामकोटिपीठाधिप जगद्गुरु श्रीमच्चन्द्रशेखरेन्द्रसरस्वती श्रीपादादेशानुसारेण श्रीमज्जयेन्द्रसरस्वतीश्रीपादैः क्रियते नारायण-स्मृतिः ।

श्री खडविल्लि सूर्यनारायणशास्त्रिरचिते कालिदासकाव्यसौरभ-नामके ग्रन्थे, कालिदासकवितायां वाल्मीकिकविताप्रभावः, कालिदासस्य दीपशिखेति प्रसिद्धिः, प्रकृतिसौन्दर्यवर्णनवैभवं, प्रकृतिसहजीवनविधानं, विश्वकल्याणभावना, तात्त्विकी प्रतिभा, सार्वकालिकसन्देशाः, श्रौत-स्मार्तप्रबोधाः इत्यादयो विषयाः उदाहरणश्लोकप्रदर्शनपूर्वकं सुललित-मनोहररीत्या निरूपयन्त ।

सर्वेऽपि सहृदयाः एतद्ग्रन्थसाहाय्येन कालिदासकाव्यगतान् मानवजीविताभ्युदयनिश्श्रेयससाधनभूतान् साम्प्रदायिकधर्मान् विजानन्तः अनुतिष्ठन्तश्च मङ्गलानि तत्तत्फलान्यवाप्नुयुरित्याशास्महे ।

यात्रास्थानम् }
नागपुरी }
प्रमादिचैत्रशुद्धतृतीया

नारायणस्मृतिः ।

**P. N. Pattabhirama Sastry,**
Vidya Sagara, Vidya Vachaspati,
Sastra Ratnakara,
*Professor of*
**Mimamsa Sanskrit University,**
VARANASI- 2.
30—4—73.

वाराणसेयं
संस्कृत
विश्वविद्यालय

**श्रीः**

विद्वद्वरैस्सहृदयतिलकैः श्री खण्डविल्लि सूर्यनारायणशास्त्रिवर्यैर्गोदावरीतट निवासिभिर्वेदतदंगशास्त्रनिष्णातैर्विरचितं "कालिदासकाव्यसौरभम्" इति ग्रन्थरत्नमामूलचूडमपठम् । शास्त्रिवरेण्यैरत्र विवेचिता विषया मामसकृदध्येतुं नुदन्तिस्म । कविकुलतल्लजस्य हृदयकमलं व्यंजनाकलया समुद्घाट्य कविसम्मतान् विषयान् यथायथं प्रत्यपीपदन् शास्त्रिवर्या इति नितरां प्रसीदामि । काव्याध्ययनाऽवसरेऽध्येतारः केवलं पदपदार्थानेव प्रतिपद्यन्ते, तदनु सकृदध्यापनाऽवसरे च तद्गतान् कांश्चन विशेषान् जानन्ति, असकृदध्यापनेन काव्यसम्बन्धि ग्रन्थान्तरपरिशीलनेन च परिपक्वमतिवैभवे सम्पन्ने कवेर्हृदयं ज्ञातुं योग्यता समुदेति । तदेवं परिश्रम्य शास्त्रिणो ग्रन्थमिममाविश्चकुरिति प्रतिभाति ।

कविः काव्येषु न केवलं प्रकृतरसपरिपोषण एव यतते । किन्तु भारतनिधिषु वेदेषुताननुसृत्य प्रवृत्तेषु सूत्रसन्दर्भेषु श्रौतस्मार्तसम्बन्धिषु स्मृतिपुराणेषु च निगूढान् प्रभुसम्मितैः शब्दनिचयैः प्रतिपादितान् पदार्थान् कान्तासम्मितवचोभिर्यथावदुपदेष्टुमभिलषति । ध्वनिप्रस्थाने मार्गप्रदर्शका आनन्दवर्धनाचार्याः ''प्रतीयमानं पुनरन्यदेव'' इत्यदिना ''लावण्यमिवांगनासु'' इत्यन्तेन यदप्राक्षुः तस्य लक्ष्यं महाकविनिर्मितं काव्यजातम् । तदिदं व्यंजनासंवलितदृष्ट्या समालोड्य शास्त्रिवर्याः ''काव्यसौरभ''माविश्चकुरिति संभावयामि ।

शास्त्रिमहाभागानां प्रयासोयं तदैव सफ़लस्स्यात् यदा सर्वत्र भारते अध्येतारो ग्रन्थमिमं समधीत्य विषयानवगच्छेयुः । अतोऽहं प्रार्थये यद्विद्यालयेषु महाविद्यालयेषु विश्वविद्यालयेषु च ये पाठ्यक्रमनिर्धारका मनीषिणो महानुभावाः, ते ग्रन्थरत्नमिदं यथायोगं पाठ्यक्रमे सन्निवेश्य शास्त्रिमहानुभावानां परिश्रमातिशयं सफलीकुर्युरिति । अन्ते च ग्रन्थनिर्मातृभ्यो धन्यवादानसंख्यान् वितरामि ।

पट्टाभिरामशास्त्री ।

"तर्करत्न, न्यायवेदान्तविद्यापारीण, दर्शनालङ्कार"

## ब्र. वे. बुलुसु अप्पन्नशास्त्रिमहोदयानां

## अभिप्रायः

श्रीगणेशाय नमः

ब्र. वे. खंडविल्लि सूर्यनारायणशास्त्रिभिः प्रणीय प्रहितः कालिदासकाव्यसौरभाह्वयोऽयं ग्रन्थो मयाऽऽमूलचूडं व्यलोकि। विलीनश्चाहमेतत्सौरभाघ्राणनाभिव्यक्तानन्दैकरसे परे ब्रह्मणि। कविकुलगुरोश्चास्य कवेः संस्कृतवाङ्मयास्थानाग्रासनाधिष्ठातृत्वं च गणनाप्रसङ्गसङ्गतकनिष्ठिकाधिष्ठितत्वेनैव निरणायि। जयदेवकविश्चैनमेवमुपश्लोकितवान्:- "हासो भासः कालिदासो विलास" इति। अत्र 'विलास' इत्यभिव्यंजकसामग्रीसामान्यवचनेन- आब्रह्मस्थायतन्त्रमाश्रुतिशिरस्सिद्धान्तमुच्चावचा विद्या यत्प्रभवा भवंति तस्या विद्याधिदेवताया ये ये विलासास्सन्ति ते सर्वेपि साकल्येन सम्भूय कालिदासे तादात्म्येन स्थितिं लब्ध्वा तस्य महाकवेः कृतिषु संबद्धास्सकलविद्यारहस्यानि व्यंजयन्तः "काव्यस्य जीवितं व्यंग्यवैभवम्" इति सिद्धान्तमुज्जीवयन्तीति सूचितम्।

तस्य चैतादृशविशिष्टकवितविशिष्टस्य कालिदासस्य काव्यजातदुग्धाब्धिममन्दधीमन्दरेणातलस्पर्शमवगाह्यालोड्य विबुधवर्यैरुद्धृतं सुधापिंडसदृक्षं पिंडितकालिदासहृदयं सकलविद्यासम्प्रदायवासनासुरभि विबुधानां केषां न तोषायालं भवेत्?

नापि चैषा कृतिकर्तृता केवलकाव्यालंकृतिज्ञसाधारणी भवितुमर्हति । अत एते विबुधवर्या निवासेन, आभिजात्येन, वृत्तेन च किमीया इति विचिकित्सायामेतदीयमितिवृत्तमेवमवेदिषम् —

पंडितरायोपाह्वजगन्नाथपंडिताखंडलस्य, विद्वत्कविशेखरेत्यादिबिरुदभूषितानां पुल्योपनामकोमामहेश्वरशास्त्रिणामेवमेवाखण्डपाण्डितीविलसितानामनेकविद्वत्पुंडरीकानां निवासेन सम्मण्डिते मुनिखंडाग्रहार एवैषां निवासः, षट्कर्मनिरतानां श्रुतशीलाध्ययनशालिनां खंडविल्ल्युपनामकाभिजनभूसुराणां वंशे स्थूलमुक्ताफलस्येवैषां जनिः, श्रौतस्मार्ताद्यखिलतन्त्ररहस्यवेतृता विस्तृता, संस्कृतांध्रांग्लहिन्दीभाषावैशारद्यं निरवद्यं, अधीतिबोधाचरणप्रचारणानि सदाचरणानीतीयती कालिदासकाव्यसौरभाविष्करणसामग्री समग्राऽत्र जागर्तीति । अत एवैते शास्त्रिणः कालिदासकाव्यसौरभाविष्करणे सर्वथा कृतकृत्यतामभजन्निति दृढं प्रत्येमि । अस्मिंश्च ग्रन्थे दीपशिखाप्रणाली दीपशिखायितेति मन्ये ।

एवमेवैते शास्त्रिवर्या गैर्वाण्यां वाण्यां सत्कृतिरूपास्सदलंकृतीराकलय्य वागधीश्वरीवरिवस्यावश्या भूत्वा विबुधपरितोषमिहचामुत्र चादधाना जीयासुश्शरदश्शतमित्याशासे ।

इत्थम्-

भट्नविल्लि<br>
30-5-73.

न्यायवेदान्तविद्यापारीण, दर्शनालंकार,

**बुलुसु अप्पन्नशास्त्री.**

# उपमा कालिदासस्य

"विश्वश्रेयः काव्यम्" (चिंतामणिसूत्रम्)

"विश्वकल्याणकारकं काव्यमेव उत्तमं काव्यं भवितुमर्हति" इति उक्तसूत्रस्याऽऽशयः। एतादृशेषु उत्तमकाव्येषु मध्ये कालिदास-महाकवेः काव्यजातं (दृश्यं श्रव्यमपि) उत्तमोत्तमं स्थानं अलंचकारे-त्यत्र न कस्याऽपि संदेहलेशः।

"कालिदासस्य" नामस्मरणेन साकं प्रथमं 'उपमा' स्मरण-मपि आयात्येव। अत्र विषये कवेरस्य रघुवंशकाव्याऽऽदिस्तुतिरेव प्रमाणं; पश्यत।

"वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥"

अत्र शिवौ शब्दार्थाविव संपृक्तौ भवतः। अर्थात् शब्दाऽर्थयोः सम्बन्धः कालत्रयेऽपि यथा अविनाभावभासितः, सर्वलोकव्यवहार-निर्वाहकत्वेन यथा जगन्माङ्गल्यकारकः शक्तिसमन्वितः, शिवयोरपि सम्बन्धः तादृश एवेति 'वागर्थावि'वेत्युपमया सूच्यते।

लोके भक्तेन आराधितो देवः स्वस्मिन् विद्यमानं प्रत्येकप्रभावं तस्मै ददाति। एवमेव कालिदासेन आराधितौ पार्वतीपरमेश्वरौ स्वभक्ताय लोककल्याणकारकं स्वसंसर्गत्वप्रभावं दत्तः। अर्थात् "शिवयोः कटाक्षकलितौ कालिदासकवेः शब्दार्थावपि (उपलक्षणत्वेन कालिदासवाङ्मयमपि) लोककल्याणाय कल्पते" इति ध्वनिरत्र

श्रूयते । अनेन कालिदासकाव्यजातं ध्वनिप्रधानं सत् "उत्तमं" बोभवीति – इति फलति ।

"उत्तमं काव्यं ध्वनिरिति व्यपदिश्यते" इति आलंकारिकाणां मतं खलु ।

एवं कालिदासोपमाः भव्यभावसौरभविशेषवितरणे सर्वसमर्थाः इत्यस्य उदाहरणान्तराण्यपि बहूनि विद्यन्ते । पश्यत —

स्वगुरवे, स्वस्य अनपत्यताप्राप्तव्यथानिवेदनसन्दर्भे दिलीपस्य वचनमेतत् ।

"तया हीनं विधातर्मां कथं पश्यन्न दूयसे ।
सिक्तं स्वयमिव स्नेहात् वन्ध्यमाश्रमवृक्षकम् ॥ (रघुवंशे)

लोके स्वहस्तेन सम्यक् संवर्धित आश्रमवृक्षको यदि वन्ध्यो भवति तादृशं वृक्षं दृष्ट्वा तद्वृक्षपालकः व्यथित एव भवति । एवमेव हे विधातः ! वन्ध्यं मां दृष्ट्वा कथं न दूयसे ? इति राज्ञः वचनम् । अत्र "आश्रमवृक्षक"मित्युपमानमहिम्ना आश्रमवृक्षस्थानीयो दिलीपः संरक्षकेण महर्षिणा आपद्भ्यः रक्षित्वा* पालित इति, स वृक्षकः स्वगुणैः पालकस्य आत्मीयस्संवृत्त इति च ज्ञायते । तर्हि आत्मीयस्य वन्ध्यत्वं महर्षिः न कदापि उपेक्षते। अपि च "वसिष्ठ-" पदस्य विधातृ पदोपात्तत्वात् एष विधाता वृक्ष (दिलीप) साफल्यप्रतिबन्धकं निवारयिष्यत्येवेति च ज्ञायते । अन्यच्च "वृक्षक"मित्यत्र अल्पार्थबोधकेन 'क' प्रत्ययेन वृक्षस्य, वृक्षेण साकं राज्ञश्च कौमाराऽवस्थाऽ

* "दैवीनां मानुषीणां च प्रतिकर्ता त्वमापदाम्" (रघुवंशे)

सूच्यते। अतः उभयोरपि सफलत्वप्राप्तये अनुरूपः कालः अग्रे विद्यत इति च ध्वन्यते।

एवं काव्यजीवितकल्पां व्यंग्यमर्यादामाश्रित्य, (काव्यजीवितं व्यंग्यवैभवं) कविरेषः अत्र उपमाने दिलीपस्य सुपुत्रोदयरूपां भाविकथासूचनां काव्यार्थसूचनामिव (दृश्यकाव्ये) कृतवान्। एवं रीत्या मङ्गलकरकथाकलितकाव्यपठनमपि अध्येतृभ्यः जीविताऽभ्युदयाय सम्पद्यते। यतः

"मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि काव्यानि प्रथन्ते। अध्येतारश्च प्रवक्तारः। वीरपुरुषकाण्यायुष्मत्पुरुषकाणि च भवन्ति।"

एवमग्रेऽपि कालिदासस्य उपमासुममंजर्याः उद्गतानि हृद्यभावसौरभ्याणि, तत्काव्यनन्दनवने विहरतामस्माकं मनांसि आश्चर्यचकितानि आमोदभरितानि च कुर्वन्त्येव। इतः परं कालिदासकवेः मालोपमायां विशेषः प्रदर्श्यते।

प्रभामहत्या शिखयेव दीपः
त्रिमार्गयेव त्रिदिवस्य मार्गः।
संस्कारवत्येव गिरा मनीषी
तया स पूतश्च विभूषितश्च ॥ (कुमारसम्भवे)

अत्र श्लोके चतुर्थपादार्थेन एवं ज्ञायते यदाजन्मशुद्धायाः नगजायाः जन्मकारणेन नगराजः प्रथमं पूतः, पूतत्वकारणेनैव तदनन्तरं स भूषितः अभवत्। अत्र महाकविना स्वीकृतं उपमानत्रयमपि उक्तार्थमेव विशदयति। यथा निसर्गपूतया मन्दाकिन्या

स्वर्गमार्गः। एवं व्याकरणविशुद्धया गिरा विद्वांश्च वस्तुनिष्ठपूतत्व-कारणेनैव भूषितावभवताम्। दीपशिखयैव दीपस्य पवित्रता श्रुतौ प्रसिद्धा दृश्यते।

"उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते। तव ज्योतींग्ष्यर्चयः"

एतावता कालिदासहृदयमेवंविधं यत् यत्र वस्तुनि सर्वेन्द्रियसन्तर्पणसमर्थं सौन्दर्यं सन्दृश्यते तादृक्सौन्दर्यं पवित्रतामूल-मित्येवेति, यतः सहजसौन्दर्यस्य पवित्रतामूलकत्वात्। विशिष्ट-विषयमेनं स्वकाव्येषु कविरेषः बहुत्र प्रकटयामास। यथा

रतेरपि ह्रीपदमादधानं गिरिजायाः (प्रथम) सौन्दर्यं तपसः प्राक् मदनसन्निधावपि शक्तिरहितं सत् तत् तपश्चरणादनन्तरमेव जितेन्द्रियं इन्द्रियजितमकरोत्। विषयमेनं कविरेषः एवं कथयामास।

"एतावता नन्वनुमेयशोभि कांचीगुणस्थानमनिन्दितायाः।
आरोपितं यद् गिरिशेन पश्चात् अनन्यनारी कमनीयमङ्कम्"॥
अत्र 'पश्चात्' इत्यव्ययस्य तपश्चरणादनन्तरमित्यर्थः। एवमेव
"इयेष सा कर्तुमवन्ध्यरूपतां समाधिमास्थाय तपोभिरात्मनः॥"

अत्र गिरिजायाः प्रथमरूपस्य तपसैव अवन्ध्यतासम्पादनं स्मर्तव्यम्। अनेन पिंडीकृतोऽर्थ एवं लभ्यते यत्, केवलं भौतिकं वस्तु अन्तस्साररहितत्वेन निसर्गसौन्दर्यरहितमिति, तदेव तपश्शक्ति-सहितं चेत् पश्चात् गिरिजासौन्दर्यमिव मङ्गलकरसौन्दर्यसज्जित सत् लोकमांगल्याय प्रभवतीति अत्र श्रूयते महान् काव्यसन्देशः।

प्रकृते "प्रभामहत्या........" इति उक्तमालोपमया उपर्युक्त-विशिष्टविषयकदम्बं प्रकटितवान् कालिदासः ।

इतः परं नूत्नवध्वाः गिरिजायाः मानसिकभावपरिणामचित्रण-विषये कालिदासोपमायाः प्रभावं द्रक्ष्यथ ।

कुहनावटुना स्वस्वरूपे प्रदर्शिते सति, तन्नूत्नवरस्य ईश्वरस्य सन्निधौ गिरिजाकन्यकायाः शृङ्गारभावपरिणामविलसनरीतिं कवीन्द्र एवं वर्णितवान् ।

"तं वीक्ष्य वेपथुमती सरसांऽगयष्टिः
निक्षेपणाय पदमुद्धृतमुद्वहन्ती ।
मार्गाऽचलव्यतिकराऽऽकुलितेव सिन्धुः
शैलाऽधिराजतनया न ययौ न तस्थौ ॥

हठादापतितं स्वस्याः तपःफलरूपं महेश्वरं दृष्ट्वा गिरिजा-कन्यका प्रथमं कुलकन्यकासुलभया भीत्या वेपथुमती बभूव। अत एव अन्यत्र गन्तुकामा सा स्वपादं उद्धृतवती । अथाऽपि स्वस्याः चिरवाञ्छितः चन्द्रशेखरः नूत्नवररूपेण स्वपुरतः आविर्भूय स्व-नेत्रचकोरं सन्तर्पयति । एतादृशसमये तन्मनसि प्रोद्गतः शृङ्गार-भावसन्दोहः वर्धमानस्सन् तां तत्रैव स्थापयित्वा सरसांगयष्टिं अकरोत् । एतादृशभावद्वयसङ्घर्षणे संलग्ना सा किंकर्तव्यतामूढा सती उद्धृतं स्वपादं तथैव स्थापितवती । एतादृश्यास्तस्याः तात्कालिकीं भावसम्मर्दपरिणामरीतिं प्रस्फुटं प्रदर्शयितुकामः एष कवींद्रः-

"मार्गाऽचलव्यतिकराऽकुलितेव सिंधुः .... ...."

इत्येवंरूपमद्भुतोपमानमत्र संयोजितवान् ।

यथा वेगेन प्रवहन्त्याः नद्याः मार्गे यदि पर्वतः स्थास्यति, तदा सा नदी तत्पर्वतप्रतिबन्धेन प्रतीपं प्रवहति । एतदन्तरे पश्चाद्भागात् आगतेन प्रवाहवेगेन पर्वतनिस्सारितः प्रवाहः भूयः पुरस्तात् धावितो भवति । एतादृशद्विविधसङ्घर्षणे संलग्ना नदी क्षणकालं कल्लोलितदशायां एकत्रैव स्थित्वा न पुरतः प्रसरिष्यति न पश्चात् । एवमेव प्रस्तुते गिरिजाऽपि तपाश्रृङ्गारयोर्मध्ये संलग्ना सती क्षणकालं आत्मेश्वरस्य समीपात् न ययौ न तस्थौ । एवं नूत्नवरसन्निधौ नूत्नवध्वाः क्षणकालीननिगूढमधुरभावपरिणामप्रदर्शनप्रभावः कालत्रयेऽपि सहृदयपाठकमनोरङ्गस्थले सुस्थिरतया संलग्नस्सन् प्रकाशते ।

एतत्सर्वं कालिदासोपमायाः प्रकाशप्रभावः ।

पश्चात् मेघदूतकाव्यादुदाहृतिः-

"तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं
गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्ध्वा ।
तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यत्त-
त्स भ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि ॥"

"वेत्रवत्या नाम नद्याः जलं हे मेघ ! त्वं पास्यसि" इत्येष एवार्थः अत्र मुख्यः । अथाऽपि रसिकशेखरः एष कविशेखरः यक्षमुखेन मेघे कामुककथां द्योतयितुकाम इव अनन्यया स्वीयोपमानप्रयोगशक्त्या 'सभ्रूभङ्गं मुखमिव' इत्येतदद्भुतोपमानरत्नमत्र श्लोकभूषणे संयोजितवान् । अनेन उपमानसंयोगेन केवलं जलस्वरूपिणी वेत्रवती, अद्य विचित्रकरविलासविलसिता विलासिनीव संवृत्ता । पश्यत-

अत्र 'वेत्रवत्याः' इति स्त्रीलिंगबलेन 'स भ्रूभङ्गं मुखं' इति पदद्वयसंयोगेन च कस्याश्चित् विलासिन्याः सभ्रूभङ्गं मुखं इति अर्थो लभ्यते। किं च 'मुखं पास्यसि' इति पदद्वयसंयोगेन तस्याः अधराऽऽस्वादनक्रिया सूच्यते। अधरक्षतसमय एव भ्रूभङ्गस्संजायते। एतद्दर्शनेन लोके कामुकेन कामुकत्वफलं प्राप्यते। एवमेव

प्रस्तुते मेघकामुकस्य नदीविलासिन्यां भ्रूभङ्गविलासविलोकन-लाभार्थं 'चलोर्मि' विशेषणं महाकविना प्रयुक्तम्। एतावता अत्र भ्रूभङ्गविलासितविलासिनीमुखाऽऽस्वादनलाभो मेघेन सम्प्राप्तः। एषा आनन्दप्राप्तिः प्रथममेव कविना सूचिता। "....सद्यः फलमविकलं कामुकत्वस्य लब्ध्वा" इति।

एवं काव्यप्रयोजनरूपेण आनन्दजनकत्वेन हेतुना पाठकानां मनांसि प्रथमतः आनन्दनिर्भराणि अत एव कर्तव्यपालनविषये सुमुखानि स्वयंप्रवृत्तानि च भवन्त्येव। एतादृशसमये उत्तमः काव्यसन्देशः सुकरमेव। पाठकमनस्सु सम्प्रविश्य तत्र कुसुमितत्वफलितत्वदशां प्राप्स्यति। एवं रीत्या लोकश्रेयस्सम्भवति च। इतः परं शाकुन्तले उपमानं दर्शयामि।

गच्छति पुरश्शरीरं धावति पश्चादसंस्तुतं चेतः।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य॥"

'अत्र "चीनांशुकमिव केतोः" इत्यद्भुतोपमानप्रयोगेण राज्ञः शरीरं ध्वजकेतुसदृशमिति, तस्य चित्तं चीनांशुकसदृशमिति च ज्ञायते। वेगेन धावतः शकटस्य उपरि बद्धं चीनांशुकं अनभिलषितं पुरोगमनं, अभिलषितं पश्चाद्धावनं च यथा करोति, तद्वत् राज्ञः शरीरमपि।

अत्र दुष्यन्तकर्तृकपुरोगमनस्य अनभिमतत्वद्योतनाय 'शरीर'पदप्रयोगः शीर्यते इति शरीरमिति व्युत्पत्त्या शकुन्तलाऽऽलिंगनादिभाग्यहीनं स्वशरीरं प्रति राज्ञः जुगुप्सा व्यज्यते । किन्तु शकटादिषु केतुना संयोजितमपि चीनांशुकं सर्वथा यथा पश्चादेव धावति, तत्सदृशं राज्ञः चित्तं स्वातन्त्र्ययुतं सत् आनन्दनिधानां शकुन्तलां प्रति वेगेन पश्चादेव धावति । अत्र एतदुपमानबलेन पुरोगमनं राज्ञा न बुद्धिपूर्वकं कृतमिति, शकुन्तलां प्रति पश्चाद्गमनं तु अप्रयत्नसिद्धमिति च ध्वन्यते ।

कश्चित् मुमुक्षुः लौकिकेषु अनिच्छुरपि, कर्मप्राबल्यात् लौकिकविषयेषु बलात् प्रवृत्तोऽपि तस्य मनः मुक्तिकान्तां प्रति स्वतः यथा पश्चात् धावति तद्वदत्र राज्ञः शरीरं मनश्च ।

परमार्थतः भारतीयाऽऽदर्शदम्पत्योः कालिदासस्य शकुन्तलादुष्यन्तयोः पवित्रप्रणयप्रभावः भाविकाले मुक्तिमार्गाऽन्वेषणाय द्वारं भवति । अत एव कण्वर्षिः शकुन्तलाप्रश्नस्य समाधानरूपेण एतयोः मुमुक्षुतां प्रकटयन् इत्थं कथितवान्–

"...... भर्त्रा तदर्पितकुटुम्ब-भरेण सार्धं
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन् ।"

एतदनुकूलमेव कालिदासशकुन्तलाप्रणयः प्रथमत एव स्थावरजङ्गमेषु समानप्रतिपत्त्या व्याप्य तपश्चरणादनन्तरं विश्वप्रेमरूपेण परिणतः । एतत्कारणेनैव कालिदासशकुन्तला 'भरतमातृत्वपदं' सम्पादितवती । एतस्याः

विश्वप्रेमप्रभाववर्णनपरं कालिदासमुद्दिश्य कथितानि रवीन्द्रकवीन्द्रवचनानि अत्र सन्दर्भे स्मर्यन्ते ।

"The Poet has shown here, as in Kumarasambhava that the beauty that goes hand in hand with moral law is eternal, that the calm, controlled and beneficent form of love is its best form, that beauty is truly charming under restraint and decays quickly when it gets wild and unfittered" ............ see my "Kalidasa hrudayamu." (102 P P.)

एतादृश एव नायिकानायकयोः शिवयोरिव प्रणयः प्रपञ्चश्रेयसे प्रभवति । एवंविधानि अद्‌भुतभव्यदिव्यभावभासुराणि उपमानानि कालिदासकृतिषु सर्वत्र समुपलभ्यन्ते । तेभ्यः कानिचिदेवोपमानानि केवलमुदाहरणार्थमेव मयाऽत्र सन्दर्शितानि, शिष्टानि एवमेव पाठकोत्तमैः परिशीलितव्यानि । एतादृशैरेवोपमानैः "उपमा कालिदासस्य" इति प्रपञ्चगौरवं अलंकृतवान् खलु कविकुलगुरुः ।

उक्तरीत्या उपमाविषयकं कालिदासप्रज्ञानं, कवीन्द्रमेनं न केवलं प्रपञ्चप्रशस्तिपात्रं, किन्तु ब्रह्मज्ञानभासुरं च अकरोत् । अत्र विषये चित्रमीमांसावाक्यमेतत् शृणुत –

"तदिदं चित्रं विश्वं ब्रह्मज्ञानादिवोपमाज्ञानात् ।
ज्ञातं भवतीत्यादौ निरूप्यते निखिलभेदसहिता सा ॥"

एवं एष कवीन्द्रः स्वस्य उपमाप्रयोगनैपुण्येन पाठकस्तोमेभ्यः ऐहिकं आमुष्मिकं च आनन्दं वितरन् 'विश्वश्रेयः काव्य'मिति सूत्ररीत्या स्वकाव्यानि विश्वश्रेयः प्राप्तये उत्तमसाधनानि अकरोत् ।

---

# दीपशिखा - कालिदासः

कविकुलगुरोः कालिदासस्य नामश्रवणमात्रेणैव 'उपमा' शब्दः आदावस्माकं स्मृतिपथमायाति । कालिदासस्य एतदुपमाप्रयोगनैपुण्यं, एतत्कवेः दीपशिखासौन्दर्यच्छायासु अतिसहजतया प्रतिबिम्बितं सत् तत्, कवीन्द्रमेनं "दीपशिखा'ऽऽख्यबिरुदभूषितं करोति । विषयमेतमुद्दिश्य अत्र लेखे संग्रहेण प्रस्तूयते ।

"आसेतोराहरिद्वारं विद्वद्गोष्ठीषु विश्रुता ।
कालिदासकवीन्द्रस्य संज्ञा दीपशिखेति या" ॥

लङ्काप्रभृति हरिद्वारपर्यन्तं याः पण्डितगोष्ठ्यः, तासु कालिदासकवेः पौरुषनाम, 'दीपशिखा' इति विश्रुतं सद्विराजते । इति उक्तश्लोकाऽर्थेन ज्ञायते ।

इन्दुमतीस्वयंवरसन्दर्भे -
"संचारिणी दीपशिखेव रात्रौ................"

इति कालिदासीयश्लोकभावेन मुग्धस्सन् श्रीविक्रमादित्यमहाराजः कवये 'दीपशिखा' नामकं बिरुदं प्रददाविति 'आचार्य' श्रीमहावीरप्रसादद्विवेदिमहोदयाः 'सरस्वती' नाम्न्यां हिन्दीपत्रिकायां प्रकटितवन्तः । प्रकटनमेतत्, उपर्युक्तं विषयं दृढीकरोति । अपि च, उक्तविषयस्य निदर्शनान्तरमपि दृश्यते । मेघदूतकाव्यस्य हिन्द्यां पीठिकाकर्तारः श्री केदारनाथशर्माणः उक्तबिरुदमुद्दिश्य स्वीयप्रस्तावनायामित्थमलिखन् ।

"महाकवि दीपशिखा का जन्म कहां है ?"

"दीपशिखा के काव्यों में उज्जयिनीवर्णन से........"

"दीपशिखा उपमा प्रधान कवि थे"

"दीपशिखा प्रकृति के परमोपासक थे"

उक्तहिन्दीवाक्येषु श्रूयमाणं 'दीपशिखा' इति पदं, केवलं कालिदासाऽभिधानमेव वक्ति, अनेन कारणेन कस्मिंश्चित्काले कवेरेतस्य 'दीपशिखे'ति पौरुषं नाम व्यवहारे विश्रुतरूपेण विद्यत इति कोहत्य कथितुं शक्नुमः।

अपि च दशमशताब्दे विद्यमानः 'विनयचन्द्रा'ऽभिध आलङ्कारिकः 'काव्यशिक्षा' नामके स्वीयाऽलङ्कारग्रन्थे केषांचित्संस्कृतकवीनां विरुदनामानि कथयन्,

'घण्टामाघः, छत्रभारविः, (दीपिका) दीपशिखा कालिदसः....*'

इत्यवदत्, कारणेनैतेन दशमशताब्द्यामपि कालिदासस्य 'दीपशिखे'ति नाम प्रसिद्धतया प्रकाशत इति प्रस्फुटमेव।

पश्चात् एतत् विरुदविषयकाः कवेरेतस्य कमनीयाः कल्पनाः 'उपमा कालिदासस्य' इत्याख्यां कालिदासस्य प्रपञ्चप्रशस्तिं प्रकृष्टतरं प्रकाशयन्ति। एतादृशीषु कल्पनासु मध्ये

'संचारिणी दीपशिखा'

कल्पना प्रथमगण्या प्रकाशते। पश्यत –

---

* 'भवभूति'रिति नामाऽपि विरुदमेवेति विवृण्वन्तः डा॰ वि. राघवन् महोदयाः ज्यायसीं परिशोधनामकुर्वन्। पश्यत (जनरल् आफ ओरियण्टल् रिसर्चि) संचिकायाम्।

"संचारिणी दीपशिखेव रात्रौ, यं यं व्यतीयाय पतिंवरा सा ।
नरेन्द्रमार्गाऽट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ॥" (रघुवंशे)

इन्दुमतीस्वयंवरसभायां स्वीयपतिं स्वयंवरमालिकया वरीतुकामा अग्रे सरन्ती यं यं राजपुत्रं पश्चात्कृतवती स सर्वोऽपि राजपुत्रः राजमार्गे स्थितः तमिस्राऽऽवृतो गृहविशेष इव प्रकाशराहित्यं प्राप ।

जडप्रकृतिः दीपशिखा न स्वयं सञ्चरति । अतोऽत्र 'संचारिणी' कल्पना कविना कृता । एतादृशी दीपशिखा स्वस्याः पुरतः स्थितानि वस्तूनि प्रकाशयन्ती, पश्चात्कृतानि वस्तूनि तमिस्राऽऽवृतानि करोति । एवमेव इन्दुमत्यपि स्वस्याः पुरतः स्थितान् राजपुत्रान् 'आत्मानमेवैषा वृणीते' इत्येवं रूपैः आनन्दप्रकाशैः प्रकाशयन्ती भूयः पुरस्तात् गमनेन प्रकाशितानेव राजपुत्रान् निराशान्धकारे पातयति ।

एवं अत्र इन्दुमत्याः संचारिण्या दीपशिखया (रात्रौ) सादृश्यं सर्वथा समीचीनं भवति । शतशः तौल्यं भजति च । लौकिकसादृश्यमेतत् । अत्र अन्यदलौकिकमपि सादृश्यं प्रतिभाति ।

"यस्य भासा सर्वमिदं विभाति"

इत्येतया उपनिषत्सूक्त्या तेजोरूपस्य परमात्मनः तेजस्सम्पर्केणैव सर्वमपि चराऽचरवस्तु प्रकाशते । एवमेव अत्राऽपि इन्दुमत्याः दिव्यशरीरकान्तिसम्पर्केण सर्वोऽपि राजपुत्रः (तत्कान्तिसम्पर्कसंयुक्तः) भासते । अपि चाऽत्र 'कान्तिपरावर्तनरूपः प्रकृतिशास्त्रसिद्धान्तोऽपि समन्वयं भजति ।

एवमत्र 'सञ्चारिणीदीपशिखोपमा' लौकिकदृष्ट्या, अलौकिकदृष्ट्या, प्रकृतिशास्त्रदृष्ट्या च, तौल्यं भजति, उपमासौभाग्यरूपसौध-

शिखरमधिरोहति । अभिषिञ्चति च आनन्दाऽद्भुतरसाभ्यां सहृदयहृदयानि विशेषतः, "लौकिकविषयवशगो मानवः राजपुत्रालिरिव उत्तमकुलजोपि विचारमूढो भवति" इत्येवंरूपोऽत्र ध्वनिश्च श्रूयते ।

"उत्तमं काव्यं ध्वनिरिति व्यपदिश्यते"

"काव्यस्य आत्मा ध्वनिः"

इति च आलङ्कारिकमतम् । एवं उत्तमकाव्यपाठका अपि उत्तमोदारभावभासितास्सन्तः लोकश्रेयस्सम्पादने बद्धकटयो भविष्यन्ति । एवं विश्वश्रेयस्सम्पादनविषये अहो! कालिदासोपमायाः दीपशिखादीपितायाः प्रभावः ! अत एवोक्तम्- 'वागनुशासन' बिरुदांऽचितेन 'नन्नयभट्टारक' महाकविना स्वस्य 'आन्ध्रशब्दचिन्तामण्यां' 'विश्वश्रेयः काव्य'मिति । एवं-

"निर्वाणोन्मुखी दीपशिखा"

लोके निर्वाणोन्मुखो दीपः तैलशेषमनुसृत्य एकस्मिन् क्षणे प्रकृष्टप्रकाशेन ज्वलति चेत्, अपरस्मिन् क्षणे मन्दप्रकाशो भवति । अन्यस्मिन् क्षणे नष्टो भवति । प्रस्तुते कस्यचित् वृद्धकञ्चुकिनः शिथिलां मतिं उक्तदीपशिखया तुलयन् कालिदासः -

"क्षणात् प्रबोधमायाति लङ्घ्यते तमसा पुनः ।
निर्वास्यतः प्रदीपस्य शिखेव जरतो मतिः ॥"

वङ्गदेशपाठयुक्ते शाकुन्तलनाटके एव एष श्लोकः संलक्ष्यते । 'रिचर्ड्ड पिषल्' इति जर्मनीदेशपण्डितः पाठमेनं प्रथमतः प्रकटित-

वान् । * प्रकृते वृद्धकञ्चुकिनो मतिः उक्तदीपशिखेव क्षणे प्रबोधयुक्ता चेत्, अपरस्मिन् क्षणे मान्द्ययुक्ता अन्यस्मिन् क्षणे नष्टस्मृतिः भवति अहो ! कियान् प्रकृतिसिद्धविषय एषः ! कीदृशी कवेः सूक्ष्मप्रकृतिपर्यालोचनदक्षा शक्तिः !

एवमेव भीकरविषयाऽपि अभिरूपरूपा निर्वाणोन्मुखदीपविषया अन्या कल्पना ।

आसन्नमृत्योः दशरथस्य अन्त्यदशां वर्णयन् कविः -

"निर्विष्टविषयस्नेहः स दशान्तमुपेयिवान् ।
आसीदासन्ननिर्वाणः प्रदीपाऽर्चिरिवोषसि ॥" (रघु०)

अत्र निर्वाणोन्मुखस्य दीपार्चिषः, आसन्नमरणस्य दशरथस्य च श्लोकगतश्लिष्टविशेषणानि तुल्यानि । प्रत्यूषे निर्वाणोन्मुखो दीपार्चिः तैलभाजनगतं तैलं सर्वं रात्रिभागे पीत्वा, कल्यसमये, सोऽर्चिः दीपदशाया अन्ते तिष्ठति । एवं दशरथोऽपि यौवनावस्थायां विषयसुखानि सर्वाण्यनुभूय (पीत्वा) अन्त्यसमये मरणदशामनुप्रविष्टः एवमेव दीपार्चिः, आसन्ननिर्वाणः समीपगतनाशः । राजाऽपि आसन्नमोक्षः ।

"निर्वाणं विवृतौ मोक्षे" इति कोशात् । स्वशरीरत्यागाऽनन्तरमेव पुण्यपुरुषाः मोक्षमार्गमनुधावन्ति खलु ।

---

* श्री गुरुप्रसादशास्त्रिविरचितया "अभिनवराजलक्ष्मी"नाम्न्या व्याख्यया साकं उक्तवंगदेशपाठयुक्तं शाकुन्तलनाटकं काश्यां पुनः मुद्रितमिति ज्ञायते ।

एवं निर्वाणोन्मुखदीपस्य दशाद्वयं दर्शयित्वा तस्य नाशदशा-विशेषमपि विवृणोति विश्वविज्ञानविलसितः कविरेषः -

"गत एव न ते निवर्तते स सखा दीप इवानिलाहतः ।
अहमस्य दशेव पश्य मां अविषह्यव्यसनेन धूमिताम् ॥"

रतिविलापसन्दर्भे एषः । यथा दीपदशायाः दीपाऽर्चिरेव जीवितसर्वस्वं भवति, तथा रतिदेव्याः मदन एव जीवितसर्वस्वं भवति । वातहत्या यथा दीपः नष्टो भवति, ईश्वरक्रोधवशात् मदनो नष्टः ।

दीपनाशानन्तरं दग्धतद्दशामात्रमेव वैवर्ण्येन युक्ता, धूमिता च दृश्यते । रतिदेव्यपि स्वजीवितेशनाशानन्तरं पतिशोकाऽग्निदग्धा, नव्यवैधव्यवेदनारूपधूमयुक्ता, धूमिता दीपदशेव दृश्यते ।

एवं मानवजीवितेष्वापतितविभिन्नदशापरिणामस्वरूपचित्रण-विषये, अहो ! दीपशिखादीपितायाः कालिदासोपमायाः अद्भुत-प्रभावः ।

## स्थिरा - दीपशिखा

रत्नदीपाः तैलं वा दीपदशां वा नापेक्षन्ते । अपि च ते मारुतहत्या न चालिताः, न निर्वापयितुं शक्याश्च । अत एव ते स्थिरतया प्रकाशन्ते । प्रस्तुते तारकासुरेण बन्धयित्वा तं सेवमानानां वासुकिप्रमुखसर्पराजानां दयनीयावस्थां कविरेषो वक्ष्यमाणश्लोकेन व्यनक्ति -

"ज्वलन्मणिशिखाश्चैनं वासुकिप्रमुखा निशि ।
स्थिरप्रदीपतामेत्य भुजङ्गाः पर्युपासते ॥" (कुमारसम्भवे)

अत्र सर्पनायकाः स्थिरप्रदीपत्वं प्राप्य तारकं सेवन्ते । कल्पनेऽस्मिन् 'स्थिर'शब्दप्रयोगेण तारकाय नित्यप्रकाशप्रदानलाभः अपि चात्र मणिशिखादीपे तैलाभावात् धूमादिनिवृत्तिः, एतत्कर्तृकाऽक्षिपीडानिवृत्तिश्च । किंच एतद्दीपस्य स्थिरत्वात् न न्यूनाधिक्यं ज्ञायते । कदापि न प्रकाशलोपश्च । एवं तारकाय यथाविनोदं, यथाऽनुकूलं क्रूरसर्पा अपि तं सेवन्ते (इति वर्णनेन तद्राक्षसात् सर्पाणां भीतिः तारकस्य लोककण्टकत्वं च सुकुमारसुमनोहररीत्या व्यज्यते । 'काव्यजीवितं व्यंग्यवैभवम्' अन्यच्च अत्र 'स्थिर'शब्दस्य 'एकत्रैव स्थितिः' इति अर्थान्तरेण 'एकत्रैव स्थिरनिवासाय राक्षसेन आदिष्टाः सर्पाः तदादेशं अक्षरशः आचरन्तः एकत्रैव स्थित्वा अर्थात् स्थिरप्रदीपधर्मं प्राप्य तं सेवन्ते) इति विशेषार्थेन च राक्षसाद्भयाधिक्यं राक्षसस्य लोकपीडा च अतिसुकुमारतया ध्वन्यते । अत एव खलु कान्तासम्मितत्वं च काव्यानाम् ।

मेघदूतकाव्यस्थितालकापुरीवर्णनसन्दर्भे कविः "....अर्चिस्तुङ्गानभिमुखमपि प्राप्य रत्नप्रदीपान् ह्रीमूढानां भवति विफलप्रेरणा चूर्णमुष्टिः"

इति रत्नदीपान् वर्णयित्वा दीपशिखासौन्दर्यवर्णने स्वस्य अभिरुचिं आविश्चकार कविरेषः । अत्र 'विफलप्रेरणा' इति विशेषणमुद्दिश्य 'विद्युल्लता' व्याख्याकाराः एवमवदन् । 'विफलप्रेरणा- निष्प्रयोजनीभूतप्रक्षेपा, अस्थानपतनाद्वा, प्रसिद्धदीपवदनिर्वाप्यज्वालत्वाद्वा । अत्र 'दीपान्' इति बहुवचनेन एकस्य यत्नतो निर्वापणेऽपि अन्येषां जागरणात् ह्रीमूढानां तत्रत्यस्त्रीणां (दीपनिर्वापणरूपस्य) मनोरथस्य

कदापि अपूरणं व्यज्यते'' एवं स्त्रीकर्तृकं मौढ्यम्, नायकानां पाठकानां च आनन्दानुभवाय कल्पते ।

''आनन्दजनकत्वमेव काव्यस्य प्रयोजनम्'' इति आलङ्कारिकमतं खलु ।

## ओषधिदीपाः

एवमेव तृणज्योतीरूपाः ओषधिदीपा अपि अतिमुदावहमेतेन दीपशिखाकविना वर्णिताः ।

''वनेचराणां वनितासखानां दरीगृहोत्सङ्गनिषक्तभासः ।
भवन्ति यत्रौषधयो रजन्यामतैलपूराःसुरतप्रदीपाः ॥''

(कुमारसम्भवे १)

## प्रदीपे अक्षररम्यता

''रघुवंशप्रदीपेन तेनाप्रतिमतेजसा ।
रक्षोगृहगता दीपाः प्रत्यादिष्टा इवाभवन् ॥''

श्रीरामचन्द्रजननसन्दर्भे एषः रघुकुलाम्बुधिचन्द्रः श्रीरामचन्द्रः नूनं रघुवंशस्य (कुलस्य) प्रदीपकल्प एव । कुलदीपक इत्यर्थः ।

एतत्प्रदीपेन राक्षसगृहगतदीपाः निष्प्रकाशीकृताः । जिता इति भावः । राक्षसदीपेषु सामान्यत्वद्योतनार्थं 'प्र' इत्युपसर्गराहित्यं कविना कृतम् । अनेन उपसर्गराहित्येन, 'राक्षसाः रामचन्द्रेण हता भवेयु'रिति भाविकथार्थः, नाटके काव्यार्थसूचनेव सूचितः । अपि चात्र अन्यो विशेषः विलसति । ''अप्रतिमभावतेजोविराजितेन कालिदासस्य 'रघुवंश'महाकाव्येन कारणेन, सामान्यकवीनां ग्रन्थाः

[5]

अधःकृताः'' एवं एकस्मादेव पद, आहोस्विदक्षरसुमनसः विशिष्टभाव-सौरभाणि उद्गच्छन्ति, इति कालिदासकविताशिल्पस्य अपूर्वत्वं अद्भुतत्वं च युज्यते, एतदक्षरशिल्पं, अक्षररम्यतायाः निदर्शनं भवति।

तैलबिन्दुसंयुक्ता – दीपशिखा

दीप्यमाने काष्ठादिगतदीपे यदि तैलं निषिच्यते तदा तत्तैलं बिन्दुशः अधस्तात् स्रवति । एतत्समये तद्बिन्दुना सह दीप्तज्वाला-खण्डोऽपि मिलित्वा अधःपतति । एतादृशदीप्ततैलबिन्दुदृश्यं कालिदासः इन्दुमतीशरीरत्यागवर्णनसन्दर्भे एवं प्राद्भुतं यथा प्रदर्शयामास –

"वपुषा करणोज्झितेन सा, निपतन्ती पतिमप्यपातयत् ।
ननु तैलनिषेकबिन्दुना, सह दीपार्चिरुपैति मेदिनीम् ॥

(रघु. ८-३८)

दीपार्चिः तैलबिन्दुना सह यथा अधस्तात् पतति, तथा इन्दुमती पत्या सह पतिता। अत्र वर्णने कविना कमनीयः काव्य-सन्देशः निक्षिप्तः ।

इन्दुमती प्रथमं स्वयंवरे दीपशिखाकल्पया स्वदेहकान्त्या अजं महाराजमाकर्षितवती । अन्त्येऽपि तादृशशरीरेणैव सा पतिमाकर्षितवती। अर्थात् भौतिकभोगानुभवाय उपयुक्तं साधनमेव स्वर्गभोगाऽनुभवाय च उपयुक्तमासीत् । अनेन अनयोर्दम्पत्योः आद्यः लौकिकानन्दः अन्त्ये अलौकिकानन्दरूपेण परिणतः ।

एतावता कालिदासकाव्यगतमर्त्यलोकः स्वर्लोकरूपेण परि-

णतः । अत एवोक्तं (शाकुन्तलनाटकमुद्दिश्य) जर्मनीदेशमहाकविना 'गोथे' महाशयेन ।

"...The Earth & Heaven itself in one sole... Combine..."

एवंविधं कालिदासकवीन्द्रः दीपशिखाच्छायासु विविधसौन्दर्योन्मेषविलसनं स्वस्य काव्यदर्पणे प्रदर्श्य तन्मुखेन, मानवजीवितेषु विविधदशापरिणामान् तन्मुखेन तन्मानवमनस्तत्वभेदं, प्रवृत्तिभेदं च प्रकृष्टप्रतिभया प्रदर्श्य एतन्मुखेन पाठकेभ्यः विविधविश्वविज्ञानवैभवं, एतन्मुखेन शाश्वतमानन्दं च प्रकल्पितवान् । इति शम् ।

---

# कालिदासकवितायां वाल्मीकिकविताप्रभावः

सूर्यवंशजानां उदारचरित्रवर्णनविषये प्रवृत्तस्य स्वस्य वाल्मीकिमहर्षेः रामायणं प्रथमतः मार्गदर्शकमभूदिति स्वरघुवंशकाव्ये कालिदासकविः :-

"अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिः ।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवाऽस्ति मे गतिः ॥"

अत्र व्याख्याता सूरिमहाशयेन एवं विवृतमस्ति -

"पूर्वसूरिभिः वाल्मीक्यादिभिः कृतं रामायणादिप्रबन्धरूपा या वाक् सैव द्वारं प्रवेशो यस्य तस्मिन् सूर्यवंशे, वज्रविद्धे मणौ सूत्रस्येव मे संचारः" अनेन, रघुवंशे कवितारीतिभावचित्रणवर्णनादीनां वाल्मीकिरामायणं कालिदासस्य मार्गदर्शकमभूदिति अवगतं भवति ।

विषयमेनं, कालिदासीयानि काव्योदाहरणान्येव विस्पष्टं करिष्यन्ति, विलोकयत –

दिलीपमहाराजः वसिष्ठधेनुं सम्यक् चारयित्वा सायन्तने स्वाऽवसथं प्रतिनिवृत्तः मार्गे वनरामणीयकं पश्यन् याति, अत्र सन्दर्भे कालिदासः –

"स पल्वलोत्तीर्णवराहयूथान्यावासवृक्षोन्मुखबर्हिणानि ।
ययौ मृगाऽध्यासितशाद्वलानि श्यामायमानानि वनानि पश्यन् ॥"
(रघु-२-१७)

रामायणे वर्षर्तुवैभववर्णनसन्दर्भे रामचन्द्रमुखात् वाल्मीकिः,

"वर्षोदकाप्यायितशाद्वलानि, प्रवृत्तनृत्तोत्सवबर्हिणानि ।
वनानि निर्वृष्टबलाहकानि, पश्यापराह्णे ह्यधिकं विभान्ति ॥"
(किष्किन्धाकाण्डे-२८-२१)

अत्र श्लोकस्थविशेषणनिर्माणादयः रघुवंशस्थवनवर्णनश्लोके प्रतिबिम्बिता इति ज्ञायते, यतः रघुवंशश्लोके पादान्तेषु सैव विशेषणनिर्माणचातुरी तान्येव कानिचित् पदानि यानि रामायणश्लोके । अत एवं ज्ञायते- यत् ललितललिता कालिदासस्य कमनीयकवितालता, रामायणोद्यानकवितालतायाः जन्यजनकरीत्या संगृहीता इति । एवंविधानि कवितासाम्यानि बहूनि रघुरामायणकाव्ययोः सन्ति ।

शकुन्तलाविरहसन्तप्ताङ्गो दुष्यन्तः कालक्षेपार्थं मालिनीनदीतीरे सञ्चरन् तत्रत्यशीतलसमीरं सिशेविषुः एवं कथयति –

"शक्यमरविन्दसुरभिः, कणवाही मालिनीतरङ्गाणाम् ।
अङ्गैरनङ्गतप्तैः, अविरलमालिङ्गितुं पवनः ॥" (शाकुन्तले ३-४)

श्रीरामचन्द्रः वर्षर्तौ सीतावियोगक्लेशितस्सन् किष्किन्धायां शीतलसमीरमेवं पातुमिच्छति ।

"मेघोदरविनिर्मुक्ताः कल्हारसुखशीतलाः ।
शक्यमञ्जलिभिः पातुं वाताः केतकगन्धिनः ॥" (२८-८)

अतोभयत्र श्लोकयोः शैत्यमान्द्यसौरभवर्णनं तुल्यं, समानौ नायकावपि वियोगवन्तौ । अथाऽपि दुष्यन्तस्य तापः बाहिरकाङ्गेषु परिमितः । बाहिरकाङ्गतापाऽपनोदनाय आलिङ्गनमलम् । रामस्य तु सीतावियोगः मनःकर्शी मनस्तापशान्तये आतुरभावेन अञ्जलिभिः पानं समुचितम् । अर्थात् तापशान्त्यै नायकद्वयेन समीरसेवनं तुल्यम् । एवमत्र भावतौल्यं, रघुवंशे रामायणप्रभावं व्यनक्ति । एवमेव वर्षर्तौ सीतावियोगखिन्नः श्रीरामः लक्ष्मणमेवं कथयति –

"एषा धर्मपरिक्लिष्टा नववारिपरिप्लुता ।
सीतेव शोकसन्तप्ता मही बाष्पं विमुञ्चति ॥"

(किष्किन्धा २८-७)

ग्रीष्मे प्रचण्डाऽतपतप्तभूमौ नवं वर्षोदकं यदि पतति तदा, तादृशभूमेः उष्णं ऊष्म उद्गच्छति । एवं वियोगदुःखतप्ता सीताऽपि उष्णं बाष्पं विमुञ्चति । एनमेव वाल्मीकिभावं गृहीत्वा कालिदासः तपश्चरन्तीं गिरिजां एवं वर्णितवान् –

"निकामतप्ता विविधेन वह्निना नभश्चरेणेन्धनसंभृतेन सा ।
तपात्यये वारिभिरुक्षिता नवैः भुवा सहोष्माणममुञ्चदूर्ध्वगम् ॥"

(कुमार-५-२३)

अत्र श्लोके गिरिजाऽपि रामायणसीतेव औष्ण्येन तप्ता सती उष्णमूष्माणं विमुञ्चति। सीतायाः भूपुत्रिकात्वात् पुत्रीवियोगे मातुः बाष्पविमुञ्चनं समीचीनमेव। अतः तत्र सीतया सह भूमातापि बाष्पं विमुञ्चति। अत्र गिरिजा भुवा सह ऊष्माणं विमुञ्चति। एवं रामायणश्लोकभावः कुमारसम्भवश्लोके प्रस्फुटं प्रतिफलितोऽभूदिति व्यक्तमेव। एवमेव वर्षर्तुवर्णनसन्दर्भे वाल्मीकिः -

"मेघाभिकामा परिसम्पतन्ती, सम्मोदिता भाति बलाकपंक्तिः।
वाताऽवधूता वरपौण्डरीकी, लम्बेव माला रचिताम्बरस्य॥"

(किष्किन्धा २८-२३)

नूनतया मेघः यदा आविर्भवति तदा बलाकपक्षिणः आकाशे मेघसन्निधौ परिभ्रमन्ति, एवं परिभ्रमणकाले तेषां गर्भोत्पत्तिर्जायते। अत्र कणादयवचनं प्रमाणम् -

"गर्भं बलाका दधतेऽभ्रयोगात्
नाके निबद्धाऽवलयस्समन्तात्॥"

एष एव विषयः गोविन्दराजीयव्याख्याने एवं विवृतः '......गर्भधारणाऽर्थं मेघमभिकामयत इति मेघाभिकामा......' एतादृशी बलाकपंक्तिः वाताऽवधूतां पौण्डरीकी मालेव भातीति अन्वयः। एनं वाल्मीकिभावं गृहीत्वा कालिदासः स्वमेघदूतकाव्ये -

"... ... ... ...
गर्भाऽऽधानक्षणपरिचयान्नूनमाबद्धमालाः
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः॥" (१ ६)

यक्षः स्वसन्देशं गृहीत्वा जिगमिषुं मेघमुद्दिश्य एवं कथयति। अत्र मेघमुद्दिश्य बलाककर्तृकं सेवनं स्वगर्भोदयोत्सवमूलकं भवति। अत एव मेघः बलाकानां नयनसुभगः।

एवमत्र कालिदासभावस्य वाल्मीकिश्लोकभाव एव मूलं सत् कालिदासकवितायां स्वप्रभावं प्रकाशयति। अत्र लौकिकव्यवहार इव 'गर्भाऽऽधान' शब्दयोगः कवेरस्य शृङ्गाररसप्रियत्वं प्रकटयतीव। परमार्थतः रामोऽपि वियोगखिन्न एव, अस्य मुखात् 'मेघाऽभिकामा' इति निसृतो विषयः यक्षमुखात् 'गर्भाधान' शब्दपूर्वकस्सन् उद्गतः। तत्समये तथाविधस्य यक्षस्य मुखात् तादृश एव शब्दप्रयोगः समुचितो वा? अस्तु।

इतःपरं वाल्मीकिकालिदासकाव्याभ्यां उदाहरणानि समान-पदरचनासंभृतानि दीयन्ते।

"तडित्पताकाभिरलङ्कृतानां
उदीर्णगम्भीरमहारवाणाम्॥" (रामायणं)

"यत्रांऽशुकाऽऽक्षेपविलज्जितानां
यदृच्छया किंपुरुषाङ्गनानाम्॥" (कुमारसम्भवम्)

"प्राचीनवाहिनीं चैव, नदीं भृशमकर्दमाम्।" (रामायणम्)

"सरितः कुर्वती गाधाः, पथश्चाश्यानकर्दमान्।" (रघुवंशम्)

"महान्ति कूटानि महीधराणां धाराऽभिधौतान्यधिकं विभान्ति।"
(रामायणम्)

"बालेन्दुवक्राण्यविकासभावात्।
बभुः पलाशान्यतिलोहितानि॥" (कुमारसम्भवम्)

एवंविधानि अन्यानि रीतिसाम्यानि उभयकाव्याभ्यां बहून्युदाहर्तुं शक्यन्ते। एतादृशसाम्यं, कालिदासकाव्येषु वाल्मीकिमहर्षेः कविताप्रभावमेवं प्रकटयति। आदिकवौ कालिदासस्य गौरवभाव एव एतत्प्रभावस्य कारणमिति ज्ञायते। कालिदासमतौ केवलं वाल्मीकिमुनिरेव 'कवि' शब्देन प्रयोक्तव्य इति एष रघुवंशश्लोकः सूचयति -

"तामभ्यगच्छद्रुदिताऽनुसारी, कविः कुशेध्माहरणाय यातः।
निषादविद्धाण्डजदर्शनोऽन्यः, श्लोकत्वमापद्यत यस्य शोकः॥"
(१४-७०)

# कालिदासस्य प्रकृतिसौन्दर्यवर्णनवैभवं प्रकृतिसहजीवनविधानं च

महाकवयः स्वेषां सुमधुरकमनीयकल्पनैः विविधप्रकृतिसौन्दर्यदृश्यानि वर्णयन्तः, तत्सहजसौन्दर्यसर्वस्वसंप्रकाशनपूर्वकं पाठकानां मनांसि आनन्दाद्भुतरसेषु निमज्जयन्तीति विदितचर एवायं विषयः विज्ञानां, अत एवोक्तमस्मदान्ध्रभाषायाम्—

'प्रकृतिकिन् भाष्यप्रणेतल् कवुल्'

एतादृशकवीनां मध्ये कालिदासकवीन्द्रः आद्य इत्यत्र तस्य प्रकृतिवर्णनान्येव परमोदाहरणानि भविष्यन्ति।

प्रस्तुते एतत्कवेः प्रकृतिवर्णनवैशद्यं, एतद्वैशद्यमनु अनुपदं झटिति भासमानमेतस्य प्रकृतिसहजीवनविधानं च अत्र संग्रहेण सन्दर्शयितुकामः ।

स्थाण्वाश्रमप्रकृतावकाण्डे वसन्तर्तुविजृम्भणं वर्णयन् एष कवीन्द्रः स्वकुमारसम्भवे—

लग्नद्विरेफाञ्जनभक्तिचित्रं मुखे मधुश्रीस्तिलकं प्रकाश्य ।
रागेण बालारुणकोमलेन चूतप्रवालोष्ठमलञ्चकार ॥

(सर्गः ३-७०)

अत्र वसन्तलक्ष्मीः (वसन्तशोभा) वासन्ताभरणैः स्वशरीरमलंकुर्वाणा विश्वसम्मोहनं यथा यथा विलसति, एवमेव कालिदासकाव्यलक्ष्मीरपि मनोहरैः प्राकृतिकालङ्करणैरेव स्वकाव्यशरीरमलंकुर्वती साक्षान्महालक्ष्मीरिव भुवनमोहनं यथा अत्र भासते । भासयति चात्र पाठकान्तरङ्गाणि । एतादृशी सहजशोभा कस्य वा सचेतनस्य मनोनेत्रोत्सवं न विदधाति ? कस्य वा मानसं अद्भुतरसे न निमज्जयति ?

अत्र कालिदासकाव्यपात्राणां प्रकृतिशोभालक्ष्म्या साकं अभेदो वर्णितप्राय आसीत् । अतोऽत्र एवं ध्वन्यते यत् मानवशरीरस्य केवलप्राकृतिकसुन्दरवस्त्वलङ्करणमेव सहजाद्भुतालङ्करणमिति, स्वर्णाद्याभरणधारणं न तथा शोभावहमिति च । एवमेव-

"बालेन्दुवक्राण्यविकासभावात् बभुः पलाशान्यतिलोहितानि ।
सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम् ॥"

(कुमार०)

"कुल्याऽम्भोभिः पवनचपलैश्शाखिनो धौतमूलाः
भिन्नो रागः किसलयरुचामाज्यधूमोद्गमेन ।
एते चार्वागुपवनभुवि छिन्नदर्भांकुरायां
नष्टाशङ्का हरिणशिशवो मन्दमन्दं चरन्ति ॥" (शाकुन्तले)

"मुक्तेषु रश्मिषु निरायतपूर्वकायाः
निष्कम्पचामरशिखा निभृतोर्ध्वकर्णाः ।
आत्मोद्धतैरपि रजोभिरलङ्घनीयाः
धावन्त्यमी मृगजवाऽक्षमयेव रथ्याः ॥" (अंकः १)

अत्र स्थावरप्रकृतिचित्रणमिव जङ्गमप्रकृतिचित्रणं च कालिदासीयं आनन्दविस्मयौ समं सञ्जनयत्येव । उत्तमचित्रकारस्यापि एतादृशप्रकृतिचित्रणनैपुण्यं दुर्लभमिति वक्तव्यम् । पवित्राज्यधूमादयः अत्र प्रकृतिसौन्दर्यपोषकाः । किंच चराचरप्रकृतौ आत्मीयप्रकृताविव सहानुभूत्यादिभिः प्रकृतिसहजीवनं, कालिदासीयपात्राणां सहजसिद्धमिति, प्रियतरमिति च वक्ष्यमाणैः श्लोकैः स्पष्टं ज्ञायत एव । वसिष्ठाश्रमं प्रति गन्तारौ दिलीपदम्पती-

'सरसीष्वरविन्दानां वीचिविक्षोभशीतलम् ।
आमोदमुपजिघ्रन्तौ स्वनिश्श्वासानुकारिणम् ॥'

(रघुवंशे १ सर्गः)

अत्र अरविन्दामोदस्य दिलीपदम्पत्योः निश्श्वासानुकारित्ववर्णनेन स आमोदः तयोः स्वनिश्श्वासवायुरिव आत्मीयः प्रियतमश्च संवृत्त इति ज्ञायते । अनेन एतयोः प्रकृतिसहजीवनविधानं प्रस्फुटमेव । एवमेव-

'हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान् ।
नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम् ॥ (रघु० १)
परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु ।
मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्धदृष्टिषु ॥' (रघु० १)

अत्र मार्गशाखिनां नाम जिज्ञासारूपेण मृगद्वन्द्वेषु आत्मरूप-सादृश्यावलोकनोत्साहरूपेण च शीलेन एतद्दम्पत्योः चराचरप्रकृतौ दृश्यमानं 'आत्मीयत्वं, आत्मौपम्यदिदृक्षादिरूपं *' वसुधैककुटुम्बकत्व-शीलं सहजसिद्धमिति अत्र स्पष्टमेव । 'नाविष्णुः पृथिवीपतिः' इति सूक्त्या विष्णंवशसम्भूतयोरेतयोः एतादृशविशिष्टविश्वभावना, 'सर्वं विष्णुमयं जगत्' इति सर्वत्र परमेश्वरांशदर्शनभावना च युज्यत एव ।

'कारणगुणाः कार्ये संक्रामन्ति' इति हि तार्किकन्यायः ।

वसिष्ठाऽऽश्रमं प्रविष्टयोरेतयोः दृष्टिगोचरं प्राप्तः तदाश्रमप्रान्त-प्रदेशः इत्थं भूतः ।

'सेकान्ते मुनिकन्याभिः तत्क्षणोज्झितवृक्षकम् ।
विश्वासाय विहङ्गानामालवालाम्बुपायिनाम् ॥' (रघु० १)
'आकीर्णं ऋषिपत्नीनां उटजद्वाररोधिभिः ।
अपत्यैरिव नीवारभागधेयोचितैर्मृगैः ॥' (रघु० १)

येषां यादृशी भावना तादृगवलोकनं, एवं चराचरप्रकृतिप्रेमरूपं एतयोः प्रकृतिसहजीवनविधानं कालिदासः दिलीपकुमारे रघुमहाराजेऽपि सम्यक् एवं प्रतिफलितं चकार । गुरवे दक्षिणार्थं स्वान्तिकमागतं कौत्सं प्रति रघुः –

* 'आत्मौपम्येन भूतानि यः पश्यति स पश्यति ॥' (गीता)

'आधारबन्धप्रमुखैः प्रयत्नैः संवर्धितानां सुतनिर्विशेषम् ।
कच्चिन्न वाय्वादिरुपप्लवो वः श्रमच्छिदामाश्रमपादपानाम् ॥'
'क्रियानिमित्तेष्वपि वत्सलत्वादभग्नकामा मुनिभिः कुशेषु ।
तदङ्कशय्याच्युतनाभिनाला कच्चिन्मृगीणामनघा प्रसूतिः ॥'
'...तान्युञ्छषष्ठाङ्कितसैकतानि शिवानि वस्तीर्थजलानि कच्चित्

(रघु०

रघुकर्तृकैरेतैः कुशलप्रश्नविधानैः रघुसार्वभौमे रामचन्द्रे 'सर्वभूतहिते रतत्वं', चराऽऽचरप्रकृतिप्रणयित्वं, परार्थैकफलगुणवत् आत्मौपम्येन सर्वत्र समदर्शनत्वमित्यादयो गुणाः, रघोः विष्णुवंशसम्-तत्वं विशेषतः प्रकृतिसहजीवनप्रियत्वरीतिं च प्रस्फुटं प्रकाशयन्ति।

एवमेव कालिदासः स्वीयं सहजीवनप्रणयित्वं स्वपार्वतीशकुन्तल-पात्रयोः प्रत्येकं प्रदर्शयाञ्चकार । तपश्चरणकाले गिरिजा तपोव-वृक्षानेवं न्यवर्धयत् ।

'अतन्द्रिता सा स्वयमेव वृक्षकान्, घटस्तनप्रस्रवणैः न्यवर्धयत्
गुहोऽपि येषां प्रथमाऽऽप्तजन्मनां, न पुत्रवात्सल्यमपाकरिष्यति ॥

(कुमार० सर्गः २

अत्र 'वृक्षकान्' इति अल्पाऽर्थे 'कप्' प्रत्ययप्रयोगे वृक्षेषु शैशवत्वं, तत्पालिकायां गौर्यां जननीत्वं च द्योत्यते, एतस्य एतज्जननीत्वं अग्रे जगज्जननीत्वरूपेण परिणमति, यतः पार्वतीपरमेश्वरौ

'........प्रपञ्चमातापितरौ.........'

भवतः । अतः एतस्याः भाविजगज्जननीत्वं आदौ वृक्षसंवर्धन-काले कालिदासः तस्याः प्रकृतिसहजीवनशीलत्वरूपेण प्रदर्शितवान्,

अत्र वृक्षैस्साकं गौर्याः न केवलं सहजीवनं, किन्तु वृक्षेषु विजातीयेष्वपि एतस्याः स्वाऽपत्यत्वदर्शनं च वर्णितम् । स्वाऽपत्यायैव मातुः स्तनप्रस्रवणं सञ्जायते । एतादृशः प्रकृतिप्रणयित्वस्वभावः, शकुन्तलायामपि सम्यक् कविना सन्दर्शितः –

"....शकुन्तला- सखिः ! न केवलं तातनियोगः । अस्ति, ममाऽपि सोदरस्नेह एतेषु (तरुषु)"

एतस्याः सोदरस्नेहमेनं घनिष्ठं कविः कण्वमुखेन एवं विशदीकृतवान् । शकुन्तलायाः बन्धुकल्पानां तपोवनतरूणामनुमतिं मुनिः तस्यै एवं पृच्छति –

"पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नाऽदत्ते प्रियमण्डनाऽपि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥"

अनेन शकुन्तलायाः प्रकृतिसहजीवनविधानेन प्रकृतिप्रेम्णा च एषा तपोवनस्थवृक्षलतासु लतारूपा, पुष्पेषु पुष्परूपा, परिमलरूपा च सती तत्तपोवनप्रकृतेः पृथक् कर्तुं न शक्या आस्ते । न चेच्छकुन्तला, सर्वं कण्वतपोवनं शुष्कप्रायं निष्फलं च स्यात् । एवं वृक्षेष्विव पशुपक्ष्यादिष्वपि एतस्याः सहजं प्रेम मेदुरं दृश्यते । पतिगृहं गच्छन्त्याः एतस्याः वियोगं असहमानः कश्चिन्मृगपोतः एवमेनां निवारयितुकामः । कण्वमहर्षेर्वचनमेतत् –

"यस्य त्वया व्रणविरोपणमिंगुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे ।

श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ॥" (४ अंकः)

एतस्याः बाल्ये वयसि एवं रूपं विश्वमोहनं विश्वप्रेम, एनां भाविकाले 'भरतमातरं' अकरोत् । किंच पार्वतीशकुन्तलापात्रयोः सुन्दरप्रकृतिवस्त्वलङ्करणप्रियत्वं, अतितरां दृश्यते । गिरिजा ईश्वर-परिचर्यार्थं तत्समीपगमनसमये एवमलंकुर्वाणा, साक्षात् जङ्गमप्रकृतिलक्ष्मी-रिव एवं प्रकाशते ।

"अशोकनिर्भर्त्सितपद्मरागमाकृष्टहेमद्युतिकर्णिकारम् ।
मुक्ताकलापीकृतसिन्दुवारं वसन्तपुष्पाभरणं वहन्ती ॥
आवर्जिता किंचिदिव स्तनाभ्यां वासो वसाना तरुणार्करागम् ।
पर्याप्तपुष्पस्तबकावनम्रा संचारिणी पल्लविनी लतेव ॥"

(कुमार० ३- २३, २४)

अत्र 'सञ्चारिणी ...... लतेव' इति लतौपम्येन तस्याः लतालक्षणलक्षितत्वं कविना सम्यक् वर्णितम् । किन्तु लतायाः गमनशक्त्यभावात् गिरिजाया एव आधिक्यवर्णनेन अत्र गिरिजा 'व्यतिरेक*' नाम्ना अलङ्कारेण च भूषिता आसीत् । परमार्थतः गिरिजा 'प्रकृतिस्वरूपिणी' खलु । एवमेव शकुन्तलाऽपि तपोवन-प्रकृतौ तन्मयीभूता अङ्गाङ्गीभावेन वर्णिता ।

"अधरः किसलयरागः, कोमलविटपाऽनुकारिणौ बाहू ।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ॥" (शाकुन्तलम्)

---

* 'व्यतिरेको विशेषश्चेदुपमानोपमेययोः । ....' (चन्द्रालोके)

अत्र पुष्पिताया लतायाः सौकुमार्यत्वसौन्दर्यत्वादिकं शकुन्तला-शरीरेऽपि सन्दृश्यते । अतः प्रकृत्या सह एतस्याः अविनाभाव-सम्बन्धः, आत्मीयता च अवलोक्यते । एवं एतस्याः प्रकृतिसह-जीवनत्वं सुस्पष्टमेव ।

इतःपरं कालिदासस्य ऋतुवर्णनवैभवप्रदर्शनाय द्वित्राण्युदा-हरणानि दर्शयित्वा विषयादेतस्माद्विरमामि ।

## ग्रीष्मर्तुवर्णनम्

"सुभगसलिलाऽवगाहाः पाटलसंसर्गसुरभिवनवाताः ।
प्रच्छायसुलभनिद्राः दिवसाः परिणामरमणीयाः ॥"

(शाकुन्तलप्रस्तावना)

## हेमन्तर्तुवर्णनम्

प्रभूतशालिप्रसवैश्चितानि, मृगाऽङ्गनायूथविभूषितानि ।
मनोहरक्रौंचनिनादितानि, सीमान्तराण्युत्सुकयन्ति चेतः ॥ (ऋतु-४)

उपर्युक्तरीत्या एतादृशसुमनोहरसुन्दरप्रकृतिचित्रणैः पाठकप्रकृति-पल्लवितां कुसुमितां च कृत्वा कालिदासकवीन्द्रः आलङ्कारिकपद्धत्या अस्मभ्यं एतादृशं काव्यसन्देशं प्रदत्तवान्, यत् –

"भिन्नमतमानवेषु मध्ये परस्परसहजीवनं तज्जीवितेभ्यः माधुर्यत्वं, प्रसन्नत्वं, जीवितचारितार्थ्यं च प्रददाति" – इति शम् ।

# कालिदासकाव्येषु विश्वकल्याणभावना

## "विश्वश्रेयः काव्यम्"

"विश्वश्रेयस्साधनेन काव्यस्य काव्यत्वं सिध्यति" इति उक्त-चिन्तामणिसूत्रस्य भावः। प्रस्तुते कालिदासमहाकवेः काव्यानि उक्तसूत्रार्थसाधने यावत् प्रभवन्ति, इत्येनं विषयमत्र विलोकयामः। उपमामुद्दिश्य प्रथमं कथ्यते –

"उपमैका शैलूषी सम्प्राप्ता चित्रभूमिकाभेदान्।
रञ्जयति काव्यरङ्गे नृत्यन्ती तद्विदां चेतः॥" (अर्थचित्रमीमांसा)

एक एव उपमालङ्कारः किंचिद्भेदेन अनेकालङ्कारभावं भजते अनेन अनेकालङ्कारेषु मध्ये निगूढं एकत्वं भासत इति वक्तव्यम्। एवमनेकेषु एकत्वसिद्धिः केवलं ब्रह्मज्ञानिन एव सम्भवति। एतद्ब्रह्म-ज्ञानमपि उपमया लभ्यत इति अर्थचित्रमीमांसायामेव एवमुक्तम् –

"तदिदं चित्रं विश्वं ब्रह्मज्ञानादिवोपमाज्ञानात्।
ज्ञातं भवतीत्यादौ निरूप्यते निखिलभेदसहिता सा॥"

ब्रह्मज्ञानेनेव उपमानेन विश्वतत्त्वं विशदं भवति। परमार्थतः विश्वे निगूढा काचिदैक्यता अवगता भवति। अनेन एवमुक्तं भवति – यत्, चराचरगतसर्ववस्तुषु दर्शनीया या सादृश्यदर्शनरूपा समतादृष्टिः सा उपमालङ्कारेण सम्भवतीति। अत एव उपमातत्त्वविदा कालिदासेन स्वकाव्येषु नदनदीपर्वतोपवनकुसुममधुकरपक्षियक्षरक्षोगणदेव-तिर्यङ्मनुष्यमत्स्यमृगहरिणगिरिनिर्झरगिरिकंदरवृक्षलतातृणतृणज्योतिरादि सर्वमपि वस्तुजातं समानप्रेम्णा स्वीकृत्य सर्वत्र विश्वगतवस्तुजाते स्वस्य

समताहष्टिः प्रकटिता । एवं सर्वत्र समत्वभावप्रदा अत एव ब्रह्मज्ञान-प्रदा च उपमालंकृतिः कालिदासकवितायां सर्वत्र सर्वचेतोहरा सन्दृश्यते । 'वागर्थाविव संपृक्तौ...' इत्यत्र उपमां पश्यन्तु, कालिदासस्य काव्यकविता उपमालङ्कारेणैव उद्भूतेत्यस्य एष रघुवंशकाव्यादिमः श्लोक एव प्रमाणम् । अत्र 'पार्वतीपरमेश्वरौ शब्दार्थाविव संपृक्तौ' इति कविः कथितवान् । अनेन उपमानेनात्र बहवो विशिष्टविषयाः विलसिता भवन्ति । यथा लोके शब्दं विहाय अर्थः न पृथग्वर्तते, एवमेवार्थं विहाय न शब्दः । तथैव शिवौ अविनाभावभासिताविति भावः । अत्र विशेषार्थस्त्वेवं विराजते- 'एकश्शब्दः सुष्ठु प्रयुक्तः-स्वर्गे लोके कामधुग्भवति' इति महाभाष्यवचनानुसारेण यथा सुशब्दार्थ-प्रयोगः सर्वलोकहितकरः पश्चात् सर्वलोकश्रेयस्करश्च भवति, तथैव शिवयोस्सम्बन्धः विश्वसृष्टिविधानादिरूपेण विश्वश्रेयसे सम्पद्यते । एव-मत्रत्यः 'वागर्थाविव' इत्युपमालङ्कारः 'विश्वश्रेयः काव्य'मित्यस्य सूत्रस्यार्थं चरितार्थं करोति । अपि च, 'इवेन समासो विभक्त्य-लोपश्च' इति वररुचिवार्तिकेन वागर्थशब्दः विभक्त्यलोपं प्राप्य 'इव' इत्यव्ययेन अव्ययसम्बन्धं वहन् एकपदमेव भवति । एवमेवात्र शिवौ द्वित्वसंख्याकावपि अर्धनारीश्वररूपेण एकरूपतां प्रापतुः ।

परमार्थतः भारतीयवैवाहिकसम्प्रदाये दम्पत्योरेकरूपता अनेन सप्तपदीमन्त्रेण एवं प्रदर्शिता- "...मनोऽहमस्मि वाक् त्वं सामाहमस्मि ऋक् त्वं सा मामनुव्रता भव ।" अर्थादत्र वरः मनोरूपो भवति, वधूः वाग्रूपा च । यथा मनसा चिन्तितमेव भावं वाक् शब्दरूपेण बहिः-प्रकटयति, तथैव वधूभावः सर्वैः प्रकारैः वरभावेन सम्मेलनं प्राप्नोति ।

एतदैक्यभावस्वरूपेण दम्पती एकरूपतां प्राप्नुतः । एतद्भारतीय-वैवाहिकसम्प्रदाये परम्परासम्बन्धेन लोकश्रेय उद्दिष्टमेव भवति । एवमेवात्र शिवयोरैक्यं देहतः भावतश्च ।

अत्रोपमाने चित्तहारी अन्यः कश्चन चमत्कारः संलक्ष्यते,- 'वागर्थाविव' इत्येकपदे एकदेशेन 'इव' इत्युपमावाचकेन उपमालङ्कारः सूच्यते । श्लिष्टेन 'वागर्थ' शब्देन निर्दुष्टवागर्थमयी कालिदासकविता सूचिता । एतावता वक्तव्योऽर्थ एवंविधः— कालिदासकविता, वागर्थ-शब्दः 'इव' इत्यव्ययेनैव उपमालङ्कारेणाव्ययसम्बन्धं वहन् विराजते । फलितांश एवंविधः, यथा शिवयोरैक्यता स्वतः लोकश्रेयसे सम्पद्यते, तथैव शिवानुग्रहप्राप्ता कालिदासकवितोपमानयोरप्यैक्यता विशेषार्थैः विश्वमोहना सती क्रमशः लोककल्याणाय कल्पते । अत एव खलु, 'उपमा कालिदासस्य' इत्येषा प्रपञ्चप्रशस्तिः केवलमेकस्मै कालिदास-महाकवेरेव सम्प्राप्ता ।

एवमेव महाकवेरियं मालोपमा –

"प्रभामहत्या शिखयेव दीपः, त्रिमार्ग एव त्रिदिवस्य मार्गः ।
संस्कारवत्येव गिरा मनीषी, तया स पूतश्च विभूषितश्च ॥"

(कु० सं० १-२८)

शर्वाण्याः जन्मकारणेन नगराजः प्रथमं पूतः तदनु विभूषित-श्चासीत् । एतत्पूतत्वविभूषितत्वयोः स्वरूपस्वभावादिकं दर्पणतल इवात्र श्लोकदर्पणतले कविः प्रत्यक्षतया प्रतिफलितं चकार । लोके दीपे विद्यमानस्सर्वोऽपि कान्तिभागस्तद्दीपशिखायां पुञ्जीकृतो भवति । अत एव तद्दीपशिखायामधिकप्रकाशस्संलक्ष्यते । एतत्प्रकाशाधिक्य-

स्याग्नेः शिखासु स्वतस्सिद्धतया विद्यमानं शुचित्वमेव एवं मूलं भवतीति भाव्यते। अग्नेश्शिखासु प्रभासमानां पवित्रतामुद्दिश्य कृष्णयजुर्वेदीय-मन्त्रभाग एवं भवति – 'उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते। तव ज्योतींष्यर्चयः' इति। एवं स्वत एव शुचित्वभासुरा अग्निशिखा दीपस्य प्रथमं परिशुद्धतामेतन्मुखेन पश्चादधिकप्रकाशतां च प्रददाति। अर्थात् दीपप्रकाशस्य दीपशिखागता स्वाभाविकी शुचितैव मूलमिति प्रतिभाति; एतादृशगुणवती दीपशिखा प्रस्तुते पार्वत्या उपमानत्वेन कविना प्रदर्शिता। एतद्दीपशिखासादृश्येन आदावम्बिकायाः आजन्मविशुद्धता तदनु अधिकशोभा च सूचिता। अत एव एतदाजन्मविशुद्धायाः जननेन नगराजः आदौ पूतः अनुपदमेव भूषितश्चासीत्। एष क्रमः '...तया स पूतश्च विभूषितश्च' इत्यनेन वाक्येन प्रदर्शितः। एवमत्र प्रदर्शितः सूचितश्च क्रमः कियता सामञ्जस्येन, कियता स्वारस्येन च समुल्लसति ! इत्यत्र सहृदयहृदयान्येव प्रमाणम्।

अत्रापरो विशेषः। दीपदर्शनसमये वयं प्रथमं दीपकान्तिमेव पश्यामः, तदनु तद्गतां पवित्रतां परिशीलनेनैव पश्यामः। अतः तच्छिखागता पवित्रता प्रथममेव प्रस्फुटं यथा न स्फुटतीति मत्वैव कविनाऽत्र 'त्रिमार्गयेव' इति द्वितीयोपमा संयोजिता। एतदुपमानेन, आहोस्विदेतन्मन्दाकिनीसादृश्येन शर्वाण्यां या नैसर्गिकी विशुद्धता सा एतदुपमानश्रवणमात्रेणैव श्रुतिगोचरा सती झटिति तत्प्रत्येकशोभां च प्रद्योतमानां करोति। एवं पावन्या मन्दाकिन्या स्वर्गमार्गो यथा पवित्रीकृतस्तथैव शर्वाण्या नगराजोऽपि पवित्रीकृतः। अपि च, यथा मन्दाकिनी भूमण्डलस्य भूषणप्राया तथैव नगजापि भारतभूमण्डलस्यालङ्कारप्राया।

अत्रापि प्रथमं पवित्रता पश्चात् शोभाधिकता च प्रदर्शिता। मन्दाकिन्याः पवित्रतां कश्चित्कवितल्लजः निन्दास्तुतिरूपेण एवं वर्णितवान् - 'कः स्वर्धुनि विवेकस्ते नयसे पापिनो दिवम्' इति।

ततःपरं कविना संस्कारवती वाक् गौर्याः उपमानत्वेन संयोजिता। व्याकरणविशुद्धियुता वाक् अधिकगौरवप्राप्तिरूपेण ऐहिके प्रयोक्तारं भूषयति, स्वर्गलोके अभिलषितार्थप्राप्तिरूपेण च। एवं पार्वत्या पर्वतराजः प्रथमं पूतः पश्चाद्भूषितश्चाभवत्। एवमेतन्मालोपमया प्रदर्शितः गौर्याः पवित्रवृत्तान्तः क्रमशः जगन्मातृत्वरूपेण लोकश्रेयसे पुरा भवति। एवं कवेरस्य सर्वोऽपि काव्यगतो विषयः क्रमशः लोककल्याणाय प्रभवतीति वक्ष्यमाणोदाहरणान्यपि व्यक्तं विशदयति।

ततःपरं सौन्दर्यवर्णनविषये कवेरस्याध्यात्मिकीं लोककल्याणप्रदां च दृष्टिं द्रक्ष्यामः। ब्रह्मसृष्टेरप्यधिकतरनैपुण्येन कालिदासकविब्रह्मा लोकोत्तरसौन्दर्येण पार्वतीशकुन्तलयो रूपं चित्रितवान्। नगजारूपवर्णनसन्दर्भे -

"सर्वोपमाद्रव्यसमुच्चयेन यथाप्रदेशं विनिवेशितेन।
सा निर्मिता विश्वसृजा प्रयत्नादेकस्थसौन्दर्यदिदृक्षयेव॥"

(१-४९)

एवं शकुन्तलारामणीयकवर्णनेऽपि -

चित्रे निवेश्य परिकल्पितसत्त्वयोगा
रूपोच्चयेन विधिना मनसा कृता नु।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः॥

अथाप्येतयोः तत्तादृगपूर्वं भौतिकसौन्दर्यं नायकमनसोराकर्षणे अशक्तमभवदिति वर्णितवान् कविः । यथा -

तथा समक्षं दहता मनोभवं पिनाकिना भग्नमनोरथा सती ।
निनिन्द रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता ॥
(कु० सं० ५-१)

तपस्साधनेन पुनः शर्वाणीसौन्दर्यं शक्तिमत्कर्तुकामः एवं वर्णयति कविः -

इयेष सा कर्तुमवन्ध्यरूपतां समाधिमास्थाय तपोभिरात्मनः ।
अवाप्यते वा कथमन्यथा द्वयं तथाविधं प्रेम पतिश्च तादृशः ॥
(५-२)

एतद्वर्णनेन कविरेवं बोधितवान् यत् केवलं भौतिकसौन्दर्यमाध्यात्मिकसौन्दर्यस्य कलामपि न स्पृशति । अर्थादाध्यात्मिकशक्तेः पुरतो भौतिकशक्तिरकिञ्चित्करेति कान्तासम्मितः कवेरेष उपदेशः भारतीयसंस्कृतिसर्वस्वसंरक्षणे जीवातुरभवत् । तपश्चरणानन्तरं सत्यशिवसौन्दर्यसम्भरितमुमाया रूपं जितेन्द्रियाकर्षणे शक्तियुक्तमभूत् । एवं तद्रूपाकृष्टो महेश्वरः पार्वतीं प्रति -

'अद्य प्रभृत्यवनताङ्गि तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ ।' (कु० सं० ५)

एवं तपश्चरणानन्तरमुमासौन्दर्यं पवित्रप्रणये, सः प्रणयः पार्वतीपरिणये, सः परिणयः कुमारप्रभवे, सः प्रभवस्तारकासुरसंहाररूपेण लोककल्याणसम्पादने च परिणत आसीदिति अहो! भारतीयसौन्दर्यतत्त्ववर्णन-

विषये कालिदासकवेः कमनीय आग्रहः ! विश्वकल्याणसम्पादनप्रयत्नश्च। तपसः पूर्वमुमया नैतादृशी भावपरिणतिः सौन्दर्यपरिणतिश्च सम्प्राप्ता।

एवमेव शकुन्तलां राजसभूयिष्ठादन्तःपुरजीवितात् वियुक्तां कृत्वा, तद्विरहानन्तरं विनिर्मलशीलां तां नायकेन संयोजितवान् कविशेखरः। एतन्नैतिकसंयोजनात्पूर्वमेव यद्यपरिणामयुतं राजसम्मेलनं दुष्यन्तेन सह सञ्जातं तदा सा कण्वदुहिता कण्वाश्रमेऽभ्यस्ताद्विश्वप्रेम्णः च्युता सती राजसप्रधानेऽन्तःपुरजीविते पदं विन्यस्येदेव। एतस्मादनर्थात् शकुन्तलां संरक्षितुमेव चतुरोऽस्मत्कविकुलगुरुः शापरूपोत्तमसाधनेन कामैकप्रधानादन्तःपुरजीवितात् आहोस्वित् प्रथमसम्मेलनात् तां वियुक्तां कृतवान्। कृत्वा च ततो विरहव्रताचरणं कारयित्वा तन्मुखेन तस्याः चित्तनैर्मल्यं निरहङ्कारतां च सम्पाद्य तद्द्वारेण कविरेष भारतीयपवित्रप्रणयप्राप्तये शकुन्तलां सत्पात्रमकरोत्।

एवं दुष्यन्तस्यापि पश्चात्तापपरिकल्पनेन कामप्रवृत्तिरूपं तन्मनःकालुष्यं क्षालयित्वा एवमुभयोः चित्तशुद्धिं, तन्मुखेन विश्वप्रेमप्रभावितपवित्रप्रणयभावं च संपाद्य, अनन्तरमेव तद्राजदम्पत्योर्निरस्तमोहयोः नैतिकं सम्मेलनमकरोत् कविः।

अस्मत्सम्प्रदायानुसारेण धर्मार्थकामाः समगौरवेणैव जायापतिभ्यां संसेव्याः। अत एव विवाहसमये कन्यादाता वरमुद्दिश्य 'धर्मार्थकामेषु त्वयैषा नातिचरितव्या' इति शास्ति, 'नातिचरामीति' वरस्तच्छासनमुररीकृत्य कन्यां स्वीकारयति। अत एव कविरेष अस्मद्दिव्यसंप्रदायं स्वकाव्यमुखेन चित्रितवानेवम्। एतच्चित्रणेनैवंविधः प्रबोधः संजायते - यत्, कालिदासप्रतिपादितं सौन्दर्यं दुःखानुभवेन

परिणामयुक्तं त्यागेन सुस्थिरं सुनिर्मलं च, तपश्चरणेन विश्वप्रेमविराजितं दिव्यशक्तिप्रदीपितं च। अतः कालिदासीये दिव्यसौन्दर्यार्णवे नियमरहिताः कामोद्रिक्ततारूपप्रवाहाः प्रविश्य विश्वप्रेमविलसितपवित्रप्रणयभावसिद्ध्या प्रपूर्णास्सन्तः दिव्यसौन्दर्यार्णवत्वं भजन्ते। सर्वोऽपि मानवप्रपञ्चः एवं दिव्यसौन्दर्यार्णवभावेन परिणतो भूयादिति कालिदासमहाकवेः परमाशयः। एतत्परमाशयेन विश्वकल्याणसाधनसिद्धिरपि सिद्धप्रायेति वक्तव्यं भवति। एतदाशयानुरूपमेवायं महाकविः शर्वाणीशकुन्तलयोर्जगन्मातृस्वरूपगौरवस्य प्राप्तिसाधनं, वृक्षलतादिषु मृगपक्ष्यादिषु च तयोस्सहजं यत् प्रेम, तदादावेव बीजरूपेणेत्थं वर्णितवान् कविः। कण्वाश्रमे वृक्षलतादिभ्यः पयःप्रदानसन्दर्भे सख्यास्समाधानरूपं शकुन्तलावाक्यमेतत् – "सखि! न केवलं तातनियोगः, अस्ति ममापि खलु सोदरस्नेह एतेषु तरुषु" (शा० १-१६) "यद्यात्मानमपि विस्मरिष्यामि लतामेनां विस्मरिष्यामि" (शा १-१६) अपरं चाश्रममृगविषयकं शकुन्तलाप्रेम प्रदर्शयन् – काश्यपः :–

यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।
श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते॥ (४-१४)

ततस्तपश्चरणसमये पयः प्रस्रवणादिना आश्रमवृक्षकान् रक्षन्त्या नगजायाः नैसर्गिकं प्रकृतिप्रेम वर्णयन् कालिदासः –

"अतन्द्रिता सा स्वयमेव वृक्षकान् घटस्तनप्रस्रवणैर्व्यवर्धयत्।
गुहोऽपि येषां प्रथमाप्तजन्मनां न पुत्रवात्सल्यमपाकरिष्यति॥"

अत्र 'वृक्षका'निति कप्प्रत्ययप्रयोगेणैव कविकुलगुरुः स्वबालकेष्विव वृक्षेष्वपि मातृप्रेम नोचेत् जगज्जननीप्रेम शर्वाणी सन्दर्शितवतीति तथ्यमेवाह । 'ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति' इति सूक्तिः त्रिकालाबाध्या सती कवेः प्रयोगमेनं चरितार्थं करोति । एवं सर्वत्र समतया संविभक्तं एतादृशमेतयोः प्रकृतिप्रेम क्रमशः प्रवृद्धं सत् विश्वप्रेमरूपेण एतदेव विश्वकल्याणरूपेण च परिणतमासीदित्यहो । शीलचित्रणादिविषयेषु कवेर्विशिष्टतमा विश्वकल्याणभावना ।

ततः कविरेषः स्वकाव्येषु अवकाशं कल्पयित्वा अश्वमेधादीनि दर्शपूर्णमासेष्ट्यादीनि च श्रौतकर्माणि वर्णयित्वा जनतामेवं प्रबोधितवान्– यत्, इहामुत्र श्रेयः कामिभिरुत्तमैः पुरुषैः श्रौतक्रिया अवश्यमाचरणीया इति; यतः सत्कर्माचरणं मानवचित्तशुद्धेर्मूलम् । अपि च जनकादयः सत्कर्माचरणेनैव चित्तशुद्धिं सम्पाद्य क्रमशः जीवन्मुक्ता आसन्निति-

'कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।'

इत्येषा सूक्तिः प्रकटयति । एवं यज्ञादिसत्कर्माचरणं क्रमशः लोकश्रेयसे सम्पद्यत इत्यस्य निदर्शनं पश्यत –

"यज्ञाद्भवति पर्जन्यः पर्जन्यादन्नसम्भवः ।
अन्नाद्भवन्ति भूतानि .... .... .... ।।" इति ।

एवं सत्कर्माचरणवर्णनेनापि लोककल्याणसिद्धिः कवीश्वरेणोद्दिष्टेति स्पष्टं ज्ञायत एव ।

एवं सन्दर्भानुसारं प्रकृतिसहजीवनविधानवर्णनेन परमेश्वरतत्त्वज्ञानविषयादिवर्णनेन च कालिदासमहाकवेः महाकाव्यानि दृश्यानि

श्रव्याणि च उपर्युक्तरीतिभिः कान्तासम्मितत्वरीत्या लोककल्याणसम्पादनविषये शतशश्चरितार्थानि अभवन्निति सर्वमनवद्यम् ।

एष निबन्धः 'ओरियंटल् ज़र्नल् (यस्० वि० वि० विश्वविद्यालय) पत्रिकायां पूर्वं प्रकाशितः समभूदिति ।

# कालिदासकवेः तात्त्विकी प्रतिभा

'महाकवीनां महाकाव्यकुसुममंजर्यः लौकिकविज्ञानेन विलसन्त्योऽपि विशेषतः ताः अलौकिकज्ञानसौरभेण सुतरां सुरभिता भवतीति' संस्कृतमहाकवीनां महाकाव्यमुखेन ज्ञायत एव । एतत् काव्यसौरभं च व्यंग्यरीत्या काव्यश्लोकसुमेभ्यः उद्गच्छतीति तज्ज्ञैः ज्ञातचर एवाऽयं विषयो वरीवर्ति । एतत् व्यंग्यवैभवमेव काव्यजीवितप्रायमिति आलङ्कारिकसमयस्संलक्ष्यते । *'काव्यजीवितं व्यंग्यवैभवं' कालिदासस्तु तादृशमहाकवीनां मालायां मध्यमणिरिव विराजते । विषयमेनं कालिदासीयैरेव काव्योदाहरणैः व्यंग्यमर्यादामाश्रित्य प्रस्तुतलेखे प्रस्तोतुकामः । यथा —

'चन्द्रं गता पद्मगुणान्न भुङ्क्ते पद्माऽऽश्रिता चान्द्रमसीमभिख्याम् ।
उमामुखं तु प्रतिपद्य लोला द्विसंश्रयां प्रीतिमवाप लक्ष्मीः ॥'

कुमारसंभवे पार्वतीमुखवर्णनाऽवसरे कविः कथयति ।

अत्र उमामुखाश्रयणाऽनन्तरं शोभालक्ष्म्या द्विसंश्रयप्रीत्यनुभव-

---

* 'काव्यजीवितं व्यङ्ग्यवैभवम्'

लाभरूपो वाच्योऽर्थः प्रथित एव। इदानीं तु व्यंग्यमुखेन उक्तश्लोके तात्त्विकमर्थं दर्शयामि। सोऽर्थः द्वितीयपादे भासते। प्रायशः व्यंग्याऽर्थप्रोद्गमः एवं विध एव। अर्थात् कतिपयेष्वेव पदेषु व्यंग्याऽर्थो विलसति।

यथा-लक्ष्मीः = संस्कृतकवितालक्ष्मीः

उमामुखं प्रतिपद्य - उमामुखवत् दिव्यभावशोभाभासमानं कालिदासकाव्यचयं प्राप्य, द्विसंश्रयां प्रीतिं = ऐहिकविषयसम्बन्धिनीं (भूलोकस्थपद्माश्रयणेन कारणेन) आमुष्मिकविषयसम्बन्धिनीं च प्रीतिं (परलोकस्थचन्द्राश्रयणेन) अर्थात् ब्रह्मानन्दात्मिकां प्रीतिं सा (संस्कृतकवितालक्ष्मीः) प्राप्नोति स्म।

अनेन वर्णनेन एवं ज्ञायते यत्, भगवत्याः भागीरथ्याः विशुद्धविपुलप्रवाहेण साकं इतरनदीप्रवाहाः मिलित्वा ऐक्यरूपेण तथा प्रवहन्ति, तद्वत् कालिदासकवेः पवित्रकवितावाहिन्यां ऐहिकविषयरूपप्रवाहैस्साकं आमुष्मिकविषयरूपप्रवाहाः मिलित्वा ऐक्येन अमृतलहरीरूपेण प्रवहन्तीति। तर्हि मार्द्वीकमृद्वीकासङ्ग इव अत्र कवितायां उभयविधविषयसङ्गमः, कस्मै वा पाठकाय न स्वदेत? कस्य वा पाठकस्य जीवितश्रेयसे न प्रभवेत्? अत एवोक्तं केनचित्, कालिदासकविताऽमृतास्वादनभाग्यप्राप्तिकामुकेन कविवरेण —

'कालिदासकविता नवं वयः सम्भवन्तु मम जन्मजन्मनि'

एवं लौकिकव्यवहारप्रवणानामिव परमाऽर्थविषयसंलग्नधियामपि संसेव्या भवति कालिदासकाव्यकवितालक्ष्मीरिति वक्ष्यमाणश्लोकेन सूच्यते। रघुवंशे कौत्सं प्रति रघुमहाराजस्य वचनमेतत् —

"गुर्वर्थमर्थी श्रुतपारदृश्वा रघोस्सकाशादनवाप्य कामम् ।
गतो वदान्यान्तरमित्ययं मे मा भूत्परीवादनवाऽवतारः ॥" (रघु०)

'रघुसमीपमागतः सर्वोऽपि विज्ञोऽर्थिजनः तस्मात् रघुमहाराजात् अनवाप्तमनोरथस्सन् भूयः दात्रन्तरं गत इति नूत्नपरीवादः मम (राज्ञः) माऽस्तु' इति वाच्योऽर्थः प्रसिद्ध एव । किंतु अत्र निगूढः अर्थान्तरोऽपि व्यज्यते । यथा -

'श्रुतस्य वेदस्य पारं अन्तं पश्यतीति श्रुतपारदृश्वा' 'श्रुतं मे गोपाय' इति श्रुतेः । एवंविधः अर्थी = विज्ञोऽर्थिजनः गुरुश्च असौ अर्थः गुर्वर्थः = मोक्षपुरुषार्थः तं कांक्षन् (सोऽर्थी) रघोः = रघुवंशनामकात् कालिदासीयकाव्यात् सकाशात् कामं स्वाऽभिलषितं मोक्षज्ञानप्राप्तिरूपं वाञ्छितं अप्राप्य, वदान्यान्तरं = तादृशज्ञानप्रदातृ ग्रन्थाऽन्तरं गतः इति मे = कालिदासस्य मम परीवादनवाऽवतारः माभूत् । वेदान्तज्ञानमपि अत्र काव्ये, (रघोः इत्यस्य उपलक्षणत्वात् कालिदासीयेषु कव्येष्विति वेदितव्यं) निक्षिप्तमिति ज्ञातव्यम् । कौत्सनामकः शिष्यः वरतन्तुगुरोः सन्निधेः यथा अधीतलौकिकपारलौकिकविद्यः सन् कृतकृत्योऽभूत्, तथा उत्तमाधिकारी पाठकोत्तमोऽपि, कालिदासकाव्यसन्निधेः धर्माऽर्थकामशास्त्रैस्साकं मोक्षशास्त्रमपि ज्ञातुं पारयत्येवेति अत्र ध्वन्यते । ध्वन्यर्थमेनं विवृणोतुकाम इव कविः एतदनन्तरश्लोक एवं वदति -

स त्वं प्रशस्ते महिते मदीये वसन् चतुर्थोऽग्निरिवाग्न्यगारे ।
द्वित्राण्यहान्यर्हसि सोढुमर्हन् यावद्यते साधयितुं त्वदर्थम् ॥

अत्र कालाऽभिलषितगुरुदक्षिणाप्रदानाय रघोः (कौत्साय)

वाग्दानरूपेण वाच्यार्थेन साकं व्यंग्यार्थोऽप्येवं प्रतिभाति। एत-द्विषये कविः पाठकोत्तमं एवं प्रबोधयतीति मन्तव्यम्। तद्यथा अर्हन्! तत्त्वविषयाऽवगाहनाय उत्तमाधिकारिन्! पाठकोत्तम! मद्विते मदीये अग्न्यगारे=इतरकाव्यापेक्षया तत्त्वभावभासिते कालिदासीये पवित्र-काव्यत्रयरूपे (दृश्यकाव्यत्रयं, श्रव्यमपि त्रयमेव) अग्न्यगारे, चतुर्थो-ऽग्निरिव वसन् अग्निवत् पवित्रशक्तिभासुरस्सन् द्वित्राण्यहानि कञ्चि-त्कालं सोढुं अर्हसि=सहनशीलेन कालिदासीयानां काव्यानां परिशीलनं कर्तुमर्हसि, एवं चेत्, त्वदर्थं=त्वया अभिलषितं मोक्षपुरुषार्थं, साधयितुं यावद्यते=साधयित्वा (मत्काव्यमुखेन) भवते (पाठकोत्तमाय) दातुं यतिष्ये। अर्थात् तत्त्वविषयकविमर्शशाली पाठकोत्तमः पूर्वं कालि-दासीयेषु लौकिकार्थं गृहीत्वा पश्चात् काव्यादस्मात् (काव्येभ्यः) पारलौकिकमप्यर्थं प्राप्तुं शक्नोत्येवेति सारांशः।

एवं उत्तरत्राऽपि एतत्काव्यकुसुमगुच्छान् तत्त्वजिज्ञासान्वितया धिया पर्यवेक्षमाणाः तत्त्वप्रज्ञानवन्तः पाठकोत्तमाः एतत्कुसुमगुच्छेभ्यः बहुविधान् व्यंग्याऽर्थपरिमलान् उपलभेरन्। किंच –

'रिक्तस्सर्वो भवति हि लघुः पूर्णता गौरवाय' (मेघदू०)

'कर्मबन्धच्छिदं धर्मं भवस्येव मुमुक्षवः' (कुमारसं०)

'बहुधाप्यागमैः भिन्नाः पन्थानस्सिद्धिहेतवः'

'त्वय्येव निपतन्त्योघा जाह्नवीया इवार्णवे' (रघुवंशः)

'अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिः बिभ्रतो नाऽभिमानः।'

(मालविकाग्निमित्रम्)

'वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी' (विक्रमोर्वशीयं)
'प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः' (शाकुन्तलम्)

एवमाद्याः सूक्तयः कवेरस्य तत्त्वविज्ञानाऽभिलाषां सुस्पष्टमावेदयन्त्येव ।

तत्त्वज्ञानस्य अवगतये पूर्वं तावत् मानवेन निरहङ्कारिणा भाव्यम् । निरहङ्कारता च पापप्रणोदनेन प्रादुर्भवति । पापप्रणाशश्च पश्चात्तापमंतरा न सम्भवति । तादृशपश्चात्तापोऽपि चेतश्शुद्धिसम्पादनेन सम्भवति । इत्येवं कारणपरम्पराप्रविष्टो मोक्षमार्गः कवेरस्य शाकुन्तलकथाभागैः व्यंग्याऽर्थमुखेन प्रकाश्यते संग्रहरूपेण ।

दुष्यन्तमहाराजस्य मृगव्यमृगाऽनुधावनेन शाकुन्तलनाटके कथावस्तुन आरम्भः । अत्र च इमे विशिष्टविषयाः उपादेयाः, येभ्यो व्यंग्याऽर्थसौरभमुदेति । त एते –

(१) आश्रममृगहिंसाऽर्थं अश्वजववर्धनाय राज्ञः सारथिप्रचोदनम् ।
(२) मृगस्य प्राणत्राणैकमतेः अतिजवेन प्रधावनम् ।
(३) आश्रममृगेण साकं तपोवनद्वारमुपगतस्य राज्ञः मुनिवाक्यगौरवेण धनुर्बाणत्यागं कुर्वतः हिंसाभावान्निवृत्तिः ।
(४) राज्ञः अहिंसाव्यापारमभिनन्दतां मुनीनां राज्ञे अनुपदमेव आशीर्वचनप्राप्तिः ।
(५) तपस्विप्रार्थनामभ्युपगम्य राज्ञः आश्रमप्रवेशः ।
(६) मुमुक्षोः मुक्तिकान्तासन्दर्शनेनेव तत्र शकुन्तलासन्दर्शनेन राज्ञः परमाऽऽनन्दाऽनुभवप्राप्तिः ।

एतैरंशैः ग्रथितं शाकुन्तलकथाभागं तत्त्वजिज्ञासाऽन्वितया दृष्ट्या यदि पश्यामः, अत्र अद्भुतं प्रयोजनान्तरमपि लप्स्यामहे। यथा —

मानवः स्वेन्द्रियवाजिवशगस्सन् लौकिकविषयरूपमृगग्रहणाय यावत् तैः त्वर्यते, तावदेव तं दुर्विषयवशगं नरं ते वाजिनः, दुष्यन्तं मृग इव दुर्विषयगहने दूरं कर्षन्ति। एवमाकृष्टस्य पुरुषस्य, अहङ्काराऽवृतो हिंसाभावः विवर्धत एव। एवमहङ्कारादिभिः प्रचोद्यमानस्तादृशः पुरुषः केनाऽपि तत्त्वनिष्ठेन गुरुजनेन प्रबोध्यमानस्सन् स्वीयां राजसीं तामसीं वा वृत्तिं यदि त्यक्ष्यति, तदा तादृशो मानवः, दुष्यन्तः शकुन्तलामिव मोक्षलक्ष्मीं प्राप्स्यति।

अन्यच्च दुष्यन्तः दुर्वासस्य शापेन शकुन्तलाऽवधीरणां कृत्वा अंगुलीयकदर्शनक्षण एव पश्चात्तापपरीतस्सन् बहुविधं विलपति शकुन्तलाऽर्थे मूर्छितश्च भवति। एतत्पश्चात्तापाऽग्निना प्रदग्धान्तःकरणस्य राज्ञो मनः षोडशवारं प्रतप्तसुवर्णमिव (चित्तं) शुद्धिमवाप। मारीचमहर्षिणा, स्वेन राज्ञः सङ्गतिसमये राज्ञः चित्तशुद्धिविषय एषः शकुन्तलां प्रति एवमुपन्यस्तः –

शापादसि प्रतिहता स्मृतिरोधरूक्षे भर्तर्यपेततमसि प्रभुता तवैव।
छाया न मूर्छति मलोपहतप्रसादे शुद्धे तु दर्पणतले सुलभाऽवकाशा॥

(शाकुन्तलम्)

"शुद्धे दर्पणे वस्तुच्छायेव हृदयग्रंथिविभेदिना पश्चात्तापेन क्षालिते अत एव निर्मलीभूते च मानवचेतसि परमात्मवस्तुनः छाया यथावत् प्रतिफलति - इत्येवंरूपा कालिदासकवेः तात्त्विकी प्रतिभा

अस्मच्चित्तवीथिषु प्रकाशते। राज्ञा, विगतमोहेन मुक्तिरिव शकुन्तला लब्धा। इतःपरं राज्ञा, मुक्तिलक्ष्मीयुक्तेनेव जनेन न किमपि कांक्ष्यं प्राप्तव्यं वा वस्तु भौतिकं विद्यते। कालिदासोऽपि स्वप्रतिभाप्रभावेण नाटकेऽस्मिन् भूतलं स्वर्गादप्यधिकतरं परिणमय्य दुष्यन्त इव सिद्ध-सर्वमनोरथोऽभवत्। अत एतत्कवेरपि कांक्ष्यं भौतिकं वस्तु न विद्यते। अस्य कवेः परमाऽऽशयस्तु पुनर्जन्मराहित्यरूप एक एव। अत एव कविरेषः दुष्यन्तमुखेन भरतवाक्ये पुनर्जन्मराहित्यरूपं स्वस्य परमध्येयमेवं प्रकाशयामास- "सरस्वती ...

ममाऽपि च क्षपयतु नीललोहितः पुनर्भवं परिगतशक्तिरात्मभूः॥

एतद्भावप्रकाशकाः अन्येऽपि प्रसङ्गाः नाटकेऽत्र संलक्ष्यन्ते।

सर्वतः प्रथमं शकुन्तलां अक्षिलक्षीकुर्वन् दुष्यन्तः इत्थं मनुते -

"इदं किलाऽव्याजमनोहरं वपुः तपः क्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया समिल्लतां छेत्तुमृषिर्व्यवस्यति॥"

(शाकुं० अं० १)

अत्र व्यंग्यार्थ एवं प्रतीयते। यथा -

नीलोत्पलपत्रधारया, सुकुमारसाधनेन अनेन शृङ्गारप्रबन्धेन, (कारणेन) समिल्लतां छेत्तुं = कठिनं कार्यं अर्थात् मोक्षपुरुषार्थ-जिज्ञासां कल्पयितुं ऋषिः = तत्तुल्यः कालिदासर्षिः, इच्छति, एवमेव -

"अनाघ्रातं पुष्पं किसलयमलूनं कररुहैः
अनाविद्धं रत्नं मधु नवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः॥ (शाकुं०)

अत्र पुष्प, किसलय, रत्न, मधु, पुण्यरूपं वस्तुपञ्चकं ज्ञानेन्द्रियग्राह्यं भवति, एतद्वस्तु-पञ्चकेन सह शकुन्तलारूपस्य अभेदो दर्शितः। अनेन शकुन्तलारूपं, अर्थात् शाकुन्तल (नाटक) कथास्वरूपं ज्ञानेन्द्रियग्राह्यं भवतीति अत्र व्यज्यते। शाकुन्तलप्रतिपाद्यं वस्तु स्थूलदृष्ट्या अग्राह्यं, किंतु विशिष्टदृशा (अलौकिकतया) ग्राह्यं भवति। महाकविः मदुक्तमेनं विशिष्टविषयं दुष्यन्तमुखेन एवं भासयति।

दुष्यन्तः –

'सखे! अनवाप्तचक्षुःफलोऽसि, येन द्रष्टव्यानां परं न दृष्टम्॥'

शकुन्तलारूपमरूपितवन्तं विदूषकं प्रति राज्ञो वचनमेतत् मुख्याऽर्थे। व्यंग्याऽर्थे तु कविर्वदति, 'एतन्नाटककथातत्त्वं परतत्त्वमिव ऐहिकेषु सर्वेष्वपि वस्तुषु अन्त्यवस्तुतया ज्ञातव्यं परमार्थतः। सखे = पाठक! द्रष्टव्यानां अर्थात् ज्ञातव्यानां परं, परमात्मवस्तु यतः अज्ञतया त्वया न दृष्टं = न ज्ञातम्, अतः अनवाप्तचक्षुःफलोऽसि। अन्धप्रायोऽसि। "यद्ज्ञात्वा नेह भूयोऽन्यत् ज्ञातव्यमवशिष्यते" इति वेदान्तवचसः, दुष्यन्तवाक्यमेतत् सूचकं भवितुमर्हति। "विदूषक इव मूढो जनः परात् परस्य वस्तुनः अज्ञानेन मानवानन्दं न लभते, जीवननिर्वृत्तिं च इति प्रतिजानीतेऽत्र कविः। वेदान्तविषयमेनं कालिदासः, सर्वदमनः आत्मस्वरूप एव" इति दुष्यन्तस्य परिज्ञानवर्णनसमये सम्यक् प्रकाशयामास। प्रथमतः स्वपुत्रमुखाऽवलोकनसमये जनकः एवं पठति।

"आत्मा वै पुत्रनामाऽसि स जीव शरदश्शतम्। ..."

इति मुमुक्षुः क्रमशः संसारात् मुक्तिं कामयमानः यथा अतिकृच्छ्रेण परमात्मस्वरूपं ज्ञास्यति, एवमेव प्रस्तुते दुष्यन्तोऽपि सर्वदमनं अतिप्रयासेन भ्रांतिसन्देहादिरूपेण आत्म- (पुत्र) स्वरूपमिति निश्चितवान् एतत्परिज्ञानं राजकर्तृकं मुक्तस्य आत्मस्वरूपपरिज्ञानं सूचयति। एतादृशज्ञानप्राप्त्यनन्तरं राज्ञा साकं एष कविराजोऽपि पूर्णमनोरथस्संवृत्तः। इतःपरं पुनर्जन्मराहित्यमेव कांक्ष्यं इति शाकुन्तलभरतवाक्यमेव सूचयति।

एवं वेदान्तादिशास्त्रगम्यमर्थमपि ऐहिकेन साकं कालिदासकाव्यलक्ष्मीः सरसतया आपादयन्ती स्वजीविताभ्युदयकांक्षिणां सर्वदा संसेव्या भवति।

'कान्तासम्मितया यया सरसतामापाद्य काव्यश्रिया
कर्तव्ये कुतुकी बुधो विरचितः तस्यै स्पृहां कुर्महे।'

इति शम्।

---

# कालिदासकृतिषु भारतीयसौन्दर्यतत्त्ववर्णनप्राभवः

वयं यदा सहजशोभितं सौन्दर्यं वस्तुनिष्ठं मानवनिष्ठं वा पश्यामः, आनन्दनिर्भराः, सुमधुरमधुराऽनुभूतिभिः निर्वृताश्च भवामः। अतः सौन्दर्यं नाम, नित्यनूतनानन्दसन्धायकमिति ज्ञायते। एनमेवाऽर्थं 'Keats' इति पाश्चात्यकविः इत्थमकथयत्।

'A thing of beauty is a joy for ever' 'नित्य-नूतनसन्तोषप्रदायको वस्तुविशेषः सौन्दर्यम् ।' इति-

चराचरप्रपञ्चेऽस्मिन् दृश्यमानानि स्वतः सुन्दरवस्तूनि सर्वाणि एवं मानवानां मनोनेत्रेन्द्रियप्रीतिं सञ्जनयन्त्येव ।

एतत्सौन्दर्यं चराऽचररूपप्रपञ्चाश्रितं सत् तं यथा भासयति, एवं काव्यप्रपञ्चमपि आश्रित्य तत् तं भासयति यथा - कालिदास-काव्यानि सुकुमारकाव्यसौन्दर्यसम्भरितानीतिधिया आप्यायमानाः बालाः वृद्धाश्च तानि वारंवारमास्वाद्य प्रकामं प्रीणन्ति, सर्वदा प्रमोदं प्राप्नुवन्ति च । अतः स्वतः सुन्दरात्मकस्य कलाप्रपञ्चस्य सम्बन्धि सौन्दर्यमेव शाश्वतसौन्दर्यमिति शुक्रनीतिसारे एवं कण्ठेहत्य कथितम् ।

'शास्त्रमानेन यो रम्यः स रम्यो नान्य एव हि' अपरं च,

'आदिराज यशोबिम्बमादर्शं प्राप्य वाङ्मयम् ।
तेषां असन्निधानेऽपि न स्वयं पश्य नश्यति ॥' इति ।

अनेन एवं प्रतिभाति यत् शकुन्तलादीनां अद्य अभावेऽपि तद्दिव्य सौन्दर्य, सौशील्यादयः कालिदासकाव्यदर्पणेषु प्रतिबिंबितास्सन्तः । अद्याऽपि तत्काव्यदर्पणानि भासयन्त्येव ।

परं पाश्चात्यकवितासौन्दर्याऽपेक्षया-

भारतीयकवितासौन्दर्यं भौतिकदृष्ट्या आध्याऽत्मिकदृष्ट्या च विश्वश्रेयस्सम्पादने दक्षमिति वक्तव्यं भवति, यतः स्वतः भारतीयानां प्रवृत्तिस्तादृशी ।

प्रस्तुते कालिदासीयैरेवोदाहरणैः भारतीयसौन्दर्यतत्त्वप्रकाशन-रीतिः संग्रहेण अत्र प्रकाश्यते । अत्र एतत्सौन्दर्यतत्त्वाऽवबोधाय

कवेः सौन्दर्यवर्णनं पूर्वभागोत्तरभागरूपेण द्विधा विभज्यते। अनेन विभागेन, पूर्वभागे अपरिपक्वं केवलभौतिकसौन्दर्यं, उत्तरभागे तपः-प्रभावभासुरं सत्यशोभासन्दीप्तं च सत् विश्वप्रेमरूपेण परिणामं प्राप्य लोकश्रेयसे सम्पत्स्यते। एतादृशमेव भारतीयसौन्दर्यं – 'सत्यं शिवं सुन्दरम्' इत्यस्य निदर्शनं भविष्यति।

शर्वाण्याः सौन्दर्यसृष्टिं वर्णयन् कविः –

'सर्वोपमाद्रव्यसमुच्चयेन यथाप्रदेशं विनिवेशितेन।
सा निर्मिता विश्वसृजा प्रयत्नादेकस्थसौन्दर्यदिदृक्षयेव॥''
(कु० सं० ४६)

किंच शिवपरिचर्यार्थं तत्समीपं गच्छन्त्याः गौर्याः सुन्दरमूर्तिः कविकुलगुरुणा एवं प्रत्यक्षीकृता –

''अशोकनिर्भर्त्सितपद्मरागं आकृष्टहेमद्युतिकर्णिकारम्।
मुक्ताकलापीकृतसिंधुवारं वसन्तपुष्पाऽभरणं वहन्ती॥''
(कु० सं० ३-६३)

''आवर्जिता किञ्चिदिव स्तनाभ्यां वासो वसाना तरुणार्करागम्।
पर्याप्तपुष्पस्तबकाऽवनम्रा सञ्चारिणी पल्लविनी लतेव॥''
(कु० सं० ३-८४)

''तां वीक्ष्य सर्वाऽवयवानवद्यां रतेरपि ह्रीपदमादधानाम्।''
(३-६७)

एवं मोहजनकेन स्वभौतिकसम्मोहनरूपेण विराजमाना नगजा-कुमारी शिवसमीपमागत्य, स्वनीलाऽलकमध्यशोभि नवकर्णिकारं सविलासं विस्रंसयन्ती, कर्णच्युतपल्लवेन स्वशिरसा भाविपतिं प्रणम्य,

ताम्ररुचा, स्वहस्तेन मन्दाकिनीपुष्करबीजमालां च तस्मै समर्पितवती। एतत्समये मदनः 'स्वसम्मोहन'बाणाय बलमादधानं गौर्याः सम्मोहन-रूपं आलम्बनं कृत्वा सः स्वबाणस्य ईश्वरं लक्ष्यीचकार। अनेन सम्मोहनपरिकरेण किञ्चित्परिलुप्तधैर्योऽपि वशित्वादीश्वरः स्वेन्द्रियक्षोभं बलवत् निगृह्य स्वतपोविघ्नकारकं मदनं भस्मसादकरोत्, अत्र सन्दर्भे कविः 'शैलात्मजा ललितं स्ववपुः तदा व्यर्थं समर्थ्य, पुनः दिव्यसौन्दर्य-लाभाय तपस्तेपे।' इति वर्णयन् –

"तथा समक्षं दहता मनोभवं पिनाकिना भग्नमनोरथा सती ।
निनिंद रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता ॥"

(कु० सं०)

"इयेष सा कर्तुमवन्ध्यरूपतां समाधिमास्थाय तपोभिरात्मनः ।
अवाप्यते वा कथमन्यथा द्वयं तथाविधं प्रेम पतिश्च तादृशः ॥

(कु० सं० ६-८)

अत्र 'सर्वोपमाद्रव्यसमुच्चयेन' सृष्टायाः गिरिजायाः प्राथमिकं भौतिकसौन्दर्यं सम्मोहनास्त्रेण सह 'व्यर्थं' अभवत्। अत एव सा तपसा अवन्ध्यरूपसम्पादनाय निश्चितवती कवेरेवंविधवर्णनेन एवं सूच्यते यत्, लोके साकल्येन सम्मोहनपरिकरपूर्णमपि केवलभौतिक-सौन्दर्य, आध्यात्मिकसौन्दर्यस्य पुरस्तात् निस्सारं निरर्थकं चेति। (इति भौतिकसौन्दर्यवर्णने पूर्वभागः)

पुरुषार्थेषु 'धर्म' एव आद्यः कामस्तु तृतीयः। एष कामः यदा धर्मपुरुषाऽर्थमनुसरन्नास्ते, अर्थात् धर्मस्य पश्चाद्गच्छति सः तदैव लोकाय अनर्थकरो न भविष्यति, प्रत्युत लोकश्रेयस्सम्पादयिष्यति

न। भारतीयसमुदाचारोपि एवंविध एव। विषयमेनं, कन्यादातुरेतदनुशासनवचनं विशदयति ।

दाता - 'धर्मार्थकामेषु त्वयैषा नाऽतिचरितव्या' इति ।

प्रस्तुते मदनदाहसमये गौरीमाश्रितः कामः न धर्मशक्तिसमन्वितः। उपर्युक्तरीत्या धर्ममननुसरतः केवलकामस्य उपद्रवकरत्वं अनर्थैकफलप्रदत्वं च सिद्धमेव, अत एतत्सिद्धान्तमनुसृत्यैव, धर्मदूषकः गौर्याः कामः यौवनाऽहङ्कारग्रस्तः सन् सम्मोहनाऽस्त्रप्रयोगसमयेऽपि शिवचित्तवशीकरणविषये विफल एव संवृत्तः । अर्थात् गौर्याः भौतिकसौन्दर्यं शिवपरिग्रहणदक्षं सत्यशिवसम्मिश्रितं च आध्यात्मिकसौन्दर्यं तदा लुप्तमस्ति, अत एव तदानीं अरूपहार्यं शिवं न वशीकर्तुं सा दक्षाऽऽसीदिति कवेः परमाशयः । अतः इदानीं शिवचित्तवशीकरणाय तपश्चरणरूपं मुख्यसाधनं सा आश्रितवती, तपसा अप्राप्यं वस्तु त्रिषु लोकेषु न विद्यते । यतः-

"यद्दुष्करं यद्दुरापं यद्दुर्गं यच्च दुस्तरम् ।
तत्सर्वं तपसा प्राप्यं तपो हि दुरतिक्रमम् ॥"

भारतीयानां मूलधनं एतत्तपोरूपधनमेव। अनेनैव भारतीयाः प्रत्येकप्रभावभासितास्सन्तः प्रपञ्चे प्रत्येकप्रशंसितं प्राप्नुवन् । प्रस्तुते अनितरलभ्यं चन्द्रशेखरसंसर्गं अनेनैव तपस्साधनेन गौरीं प्रापयितुकामः कालिदासः तया पञ्चाग्निमध्यादि दुष्करं तपः कारयितवान् । एतत्तपश्चरणाऽनन्तरकालिकं गिरिजासौन्दर्यं, यत् इतःपूर्वं निष्फलं संवृत्तं, इदानीं अपूर्वप्रभावशोभाभासितं सत् शर्वचित्ताकर्षणे समर्थमभूत् । विशिष्टविषयमेनं नगजानितम्बवर्णनसन्दर्भे कविकुलगुरुरेषः एवं वर्णितवान् ।

एतावता नन्वनुमेयशोभि काञ्चीगुणस्थानमनिन्दितायाः ।
आरोपितं यत् गिरिशेन पश्चात् अनन्यनारीकमनीयमङ्कम् ॥
(कु० सं० १-३७)

अत्र 'पश्चात्' इति अव्ययस्य 'तपश्चर्याऽनन्तरं' इति मल्लिनाथसूरिमहामहोपाध्यायस्य व्याख्या। तपसः अनन्तरं गिरिजासौन्दर्यं प्रियेण परिगृहीतं सत् -

'प्रियेषु सौभाग्यफला हि चारुता'

इति चारुत्वलक्षणलक्षितमभवत् ।

अपरश्चात्र विशेषोऽस्ति लोके सौन्दर्यं तपःप्रभावसमलङ्कृतं यदा स्यात्, तादृक् सौन्दर्यं पापवृत्तिं दूरतः कृत्वा लोकमाङ्गल्यसम्पादनरूपेण लोके आदर्शत्वं प्राप्स्यति । यथा -

तपश्चरणपूतायाः पार्वत्याः आंतरङ्गिकविशुद्धिं, तद्विशुद्ध्या विराजमानं तद्विनिर्मलरूपं, विनिर्मलशीलं च विलोक्य मुदितस्सन् महेश्वरः स्वयं शर्वाणीं प्रत्येवं कथयति -

'यदुच्यते पार्वति पापवृत्तये न रूपमित्यव्यभिचारि तद्वचः ।
तथाहि ते शीलमुदारदर्शने तपस्विनामप्युपदेशतां गतम् ॥'' (-३६)

अनया सूक्त्या ।

'यत्राऽऽकृतिस्तत्र गुणाः'

इति सूक्तिः चरितार्था भवति स्म ।

एवंरीत्या तद्रूपमिदानीं परमेश्वरनेत्रचकोरचन्द्रिकायमानं सत् तज्जितेन्द्रियं इन्द्रियजितमकरोत् । झटिति ईश्वरः महेश्वरो भूत्वा तत्पाणिग्रहणपूर्वकं सरसाङ्गयष्टिं शर्वाणीं एवं कथयति -

'अद्य प्रभृत्यवनताङ्गि तवाऽस्मि दासः
क्रीतस्तपोऽभिरिति वादिनि चन्द्रमौलौ । ...."

तपःप्रभावस्तादृशः ।

एवंरीत्या तदा कालिदासकवीन्द्रेण विश्वश्रेयःकामनया कारितं गौरीतपः अद्याऽपि भारतीयकन्यकाजनस्य सौभाग्यजीवितलाभाय तत्पतीनां जीवितसौभाग्यलाभाय च मूलमभूदिति अहो ! भारतीयसौन्दर्यतत्त्ववर्णनविषये कविकुलगुरोः कियती प्रतिभा निपुणता च ।

एवमत्र पवित्रभारतीयप्रणयवैभववर्णनप्रभावेण पार्वतीपरमेश्वरौ, 'परस्परतपस्सम्पत्फलायितपरस्परौ' सन्तौ 'प्रपञ्चमातापितरौ' अभवताम् । अनेन भारतीयप्रणयश्च पवित्रप्रभावभासितस्सन् प्रपञ्चप्रशस्तिमलभत ।

एवमत्र गिरिजासौन्दर्यं पवित्रप्रणये, सः प्रणयः परमेश्वरपरिणये, सः परिणयः कुमार (स्वामि) प्रभवे च सार्थक्यमभजत् ।

एवमत्र कालिदासपार्वती 'जगन्मातृ'गौरवमधिष्ठितवती । एवं पार्वतीपरिणयसन्दर्भे कवेः क्रमपरिणामयुतवर्णनरीतिं पात्रोन्मीलनविधानं, भारतीयपवित्रप्रणयगोपनपद्धतिं च स्मारं स्मारं कस्य वा सहृदयस्य विज्ञ मनः मानसे नाभिरमेत ?

एवमेव कवेः शाकुन्तलगतशकुन्तलासौन्दर्यवर्णनविधानमपि अद्भुतावहमेव । अत्र कालिदासकविब्रह्मणः (वस्तु) सृष्टिविधानं, चतुर्मुखब्रह्मसृष्टेर्विलक्षणं दृश्यते । यतः कविब्रह्मणा शकुन्तला एवं सृष्टा-

"चित्रे निवेश्य परिकल्पितसत्त्वयोगा
रूपोच्चयेन विधिना मनसा कृताऽनु ।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः ॥" (शाकुं०)

एतादृश्यास्तस्याः बाल्यजीवितं शर्वाण्या इव, कालिदासर्षेः काव्यतपोवने,

'पवनोद्धूतैर्धूमैराहुतिगन्धिभिः'

पविलिते - यापितमभूत् । अपि च तत्रत्यमुग्धमृगैस्साकं तपोवनवृक्षलतादयः शकुन्तलायाः गौर्या इव अतीव आत्मीयास्संवृत्ताः । अत एव शर्वाणीव शकुन्तलाऽपि 'पातुं न प्रथमं व्यवस्यति जलं वृक्षेष्वपीतेषु सा' एवं उभयनायिकयोः अन्तर्विलीनस्य विश्वप्रेम्णः प्रभावं आदौ प्रकृतिप्रेमरूपेण कविः प्रदर्शितवान् ।

एवंस्थिते मदनस्येव दुष्यन्तसार्वभौमस्य कण्वाश्रमागमनं तस्याः शृङ्गारभाववाहिन्याः उद्गाराय कारणमभूत् । अशाश्वतात् यौवनोद्वेगात् उद्भूतं प्रेमाऽपि अशाश्वतमेव स्यात् । एवंविधं प्रेम भारतीयसंस्कृतौ अवाञ्छितमेव भवेत् । यतः कालिदासीयसौन्दर्यवर्णनं सच्चिदानन्दात्मिके दिव्यप्रणये एव पर्यवस्यति । अतः अत्र नवयौवनाहङ्कारदोषदूषितं एतस्याः प्रेम निराकर्तुं कविः यथापुरं (मदनदाहमिव) दुर्वासशापाऽभिभवत्वं बुद्धिपूर्वकं परिकल्प्य, कामस्य हठादाक्रमणात् नायिकाममायिकां संरक्षितवान् ।

दुष्यन्तपरिणीतां शकुन्तलामधिकृत्य रवीन्द्रकवीन्द्रः एवमुक्तवान् ।

"Dust settles on the flower of the forest. But in spite of it she easily retains her own beautiful cleanliness."

एवं नायिकाद्वयविषये यौवनाऽहङ्कारदोषनिष्कासनपटुना उक्तसन्निवेशद्वयबलेन तदहङ्काररूपं किल्बिषं कालिदासेन प्रक्षालितम्। पश्चात् गिरिजाया इव शकुन्तलाया अपि चित्तनैर्मल्यसम्पादनाय मारीचाश्रमे तया तपः कारयित्वा, तेनैव साधनेन तां नायकमानसराजहंसीं यथा परिणमय्य पश्चात् सपुत्रामेनां नायकेन संयोजितवान् कविः।

"त्रिभिर् ऋणवा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणः यः पुत्री यज्वा ब्रह्मचारिवासी"

इति वैदिकसूक्त्या अत्र दुष्यन्तः पुत्रलाभेन स्वयं पितृणात् विमुक्तस्सन् चरितार्थस्संवृत्तः। इदानींतनकामेन दुष्यन्तदम्पत्योः शिवयोरिव न काऽपि क्षतिः सम्भवति। अद्य कामः पुत्रप्रदानरूपधर्मननुसृत्यैव प्रचलति। एवंरीत्या भारतीयवैवाहिकपवित्रबन्धः -

"धर्मप्रजासम्पत्त्यर्थं स्त्रियमुद्वहेत्"

इति सूत्रेण सुसम्बद्धः पूतश्च सन् मानवजीवितस्य क्रमशः चरितार्थतां सम्पादयत्येव।

एवं अत्रापि कविकुलगुरोः सौन्दर्यपरिणामवर्णनक्रमरीतिः सहजसुन्दरसुमनोहरा सम्प्रकाशते, अत्र सन्दर्भे 'गेटे' इति शार्मण्य (जर्मनी) देशीयपण्डितेन उक्तं आंग्लतगीतमेकम्-

शाकुन्तलकथामञ्जरीसौरभाणि खण्डखण्डान्तरेषु विकीर्यमाणमत्र दर्शयितुकामः।

[15]

(Sakuntala its inner meaning)

'Would'st thou the young year's blossoms
And the fruits of its decline,
And all by which the soul is charmed,
Enraptured, feasted, fed,
Would'st thou the Earth and Heaven itself
In one sole name combine ?
I name thee, O SAKUNTALA ! and all at
Once is said. (Goethe)

उक्तांग्लगीतानुसारेण नवयौवनविकासविलसितानि कुसुमानि एकत्रैव स्वीयपरिणामरूपैः फलैस्साकं सम्पादितं अद्भुतं सरससम्मेलनमेव 'शाकुन्तलनाटकम्' इति पर्यवस्यति । अन्यच्च एतन्नाटकं, एकस्मिन्नेव केन्द्रे स्वर्भूलोकौ अतिसहजतया समानकान्ते सम्मेलयिष्यति च ।

'गेटे' महाकविना न केवलमानन्दपारवश्येन कथितमेतत् गीतम् । अपितु गीतमेतत्,कविकुलगुरोः, कवितातत्त्वनिर्णायकः कस्यचित्साहित्यविमर्शकाऽग्रेसरस्य ('गेटे' पण्डितस्य) निष्पाक्षिकः, निस्सङ्कोचः न्यायसम्मतश्चाऽयं निर्णयः । अत एव उक्तसुभाषिते प्रत्येकः परमार्थः अन्तर्निहित आस्ते, सः कीदृश इति चेत् ।

'पुष्पं फलरूपेण, भूतलं स्वर्गरूपेण, भौतिकं आध्यात्मिकरूपेण च परिणामप्राप्तिः एतेषां क्रमपरिणामचरितमेव 'शाकुन्तलनाटकम्' इत्येवंरूपः परमार्थः स्वीयगीते गेटेपण्डितेन निरूपितः ।

अन्यच्च एतस्मिन् नाटके सुमनोहरं सम्मेलनद्वयं विद्यते । प्रथमे अङ्के नायिकानायकयोस्सम्मेलनं, केवलभौतिकरूपं अस्थिरभावो-

द्वारेण चञ्चलप्रेम्णा च भासितं, पश्चात् सप्तमेऽङ्के यत् सम्मेलनं तत् शाश्वताऽऽनन्ददायके मोक्षप्रदे च मारीचाश्रमे संवृत्तम्। अत एव तत् द्वितीयं नैतिकसम्मेलनं आध्यात्मिकाऽऽनन्ददायकं सत् परिणतम्। एतत् परिणामक्रमरीतिप्रदर्शनमेव एतन्नाटकलक्ष्यं बोभवीति।

अतः सर्वमपि एतन्नाटककथाचक्रं एकस्मात् प्रपञ्चात् अन्यस्मिन् प्रपञ्चे परिवर्तितुं, अर्थात् भौतिकसौन्दर्यपरिमितप्रेम्णः नैष्ठिकसौन्दर्यसज्जिते दिव्यप्रणयस्वर्गे भारतीयदम्पती उद्धर्तुं कविकुलगुरुणा एतन्नाटकं उद्दिष्टं। (रवीन्द्रकवीन्द्रस्य भावानुसरणमेतत्)

किंच अंगुलीयकप्राप्त्यनन्तरं राज्ञः पश्चात्तापाय कारणं सन्तानाऽभाव एवेति।

"संरोपितेऽप्यात्मनि धर्मपत्नी त्यक्ता मया नाम कुलप्रतिष्ठा।
कल्पिष्यमाणा महते फलाय वसुन्धरा काल इवोप्तबीजा॥"

(शाकुं० अंकः ६–१४)

इत्यनेन श्लोकार्थेन, विशेषतः अवत्योपमानेन व्यक्तं भवत्येव-'स्त्रिया उद्वाहः पत्युः धर्मप्रजासम्पत्तिफलकः खलु' एवंविधपश्चात्तापेन, तपश्चरणेन च भारतीयादर्शदम्पत्योः शकुन्तलादुष्यन्तयोः चित्तशुद्धिं सम्पाद्य, कामकलुषप्रवृत्तिं क्षालयित्वा, कविः तौ पवित्रप्रणयप्रकाशितप्रविमलमूर्ती अकरोत्। 'अद्यतनदुष्यन्तदृष्टेः अद्यतनीना शकुन्तला केवलं दिव्यप्रणयज्योतिः, स्वजीवनज्योतिश्च भूत्वा सा चकासति। अद्यतनकामेन धर्ममनुसरता दम्पत्योरेतयोः न काऽपि क्षतिस्सञ्जनिष्यति' इदानीमेतौ भारतीयप्रणयाय परमोदाहरणत्वं भजतः। अतः अद्य एतौ मेलयित्वा कविः काव्यं च चरितार्थतामभजत्।

अनया काव्यप्रणाल्या एवं ज्ञायते यत्, नियमरहितं असंस्कृतं च सौन्दर्यं शक्तिरहितं क्षणभंगुरं च भवति ।

नैष्ठिकसौन्दर्यमेव नित्याऽऽकर्षणोल्लसितं शुभप्रदं च । 'दम्पत्योः प्रेम यावत् स्वार्थयुतं भवेत्, तावत् तत् एकमपि सत्फलं न दास्यति। किंच तत् प्रेम वात्सल्यरूपेण संघे यावत् न परिव्याप्तं भवेत्, तावत् तादृश प्रेम्णः न किमपि शाश्वतत्वं चारितार्थ्यं वा जायेत इति। परमार्थतः कालिदासकवेः सौन्दर्यजगत् सौजन्येन जीवकलया च शोभमानं भवति । एवं तत्, सुविशालविश्वं सुरुचिरप्रेमभावेन आश्लिष्यति। एवं कालिदासप्रतिपादितं सौन्दर्यं सर्वत्र, त्यागेन सिध्यति, दुःखेन पश्चात्तापेन च नूतनत्वं तपसा दिव्यत्वं च आप्नोति । एतादृशदिव्यसौन्दर्याऽर्णवे नियमरहिताः कामोद्रिक्तताप्रवाहाः अनेके सङ्क्रम्य भारतीयप्रणयभावत्वसिध्या परिपूर्णतामाप्नुवन्ति । सर्वमपि जगत् तादृश दिव्यसौन्दर्यधामरूपेण परिणतं भवेदिति कविकुलगुरोः कमनीयाशयः । अत्र सन्दर्भे योगित्वगृहस्थत्वभावौ कालिदासकाव्येषु सिंहमानवशावकाविव विरुद्धावपि स्नेहेन परस्परं संश्लिष्टतां भजतः, कालिदासीयेषु योगित्वगृहस्थत्वयोः एतत्पवित्रसम्बन्धं मदनः मध्येछेत्तुमुद्यतः । अत एव कवीश्वरः ईश्वरेण मिलित्वा तादृशमदनस्योपरि वज्रपातं कृत्वा कल्याणमयेन गार्हस्थ्येन पवित्रतपोवनसम्बन्धं पुनः स्थापितवान् । अर्थात् स्त्रीपुरुषयोः पवित्रसम्बन्धं मदनस्य हठादाक्रमणात् रक्षित्वा तत्सम्बन्धं तपःपूते योगासने प्रतिष्ठापयामास । उक्तरीत्या कालिदासः भारतीयपवित्रप्रणयप्रभावप्रदर्शनमुखेन 'वसुधैककुटुम्बकभावं' उपदिशन् नूनमेषः 'जातीयमहाकवि'रिति पदमलञ्चकार ।

एवं विश्वश्रेयस्सम्पादकैः एतज्जातीयमहाकवेः काव्यसन्देशैरेव सर्वाऽपि मानवजातिः आपद्भ्यः संरक्षिता भवेत् । अतः आधुनिके यन्त्रयुगे कालिदासकाव्यपठनं शुष्कजीवितेभ्यः अमृतत्वं ब्रह्मानन्दत्वं च प्रददाति इत्यत्र न कोऽपि सन्देहलेश इति शम् ।

# कालिदासकृतिषु सार्वकालिकसन्देशाः

महाकविः कालिदासः 'कविकुलगुरु'रिति, कर्तव्यं कालिदासादेः काव्यानां परिशीलनं' इति, 'कालिदासकविता मम जन्मजन्मनि सम्भवतु' इत्येवं बहुभङ्गिभिः बहवस्सहृदयकवयः कालिदासकवित्वविषये स्वस्वप्रत्येकाभिलाषं प्रत्येकं प्रकटीकृतवन्तः । अनेन कारणेन एतत्कवेः कवितायां अपूर्वरामणीयक-आकर्षण-प्रत्येकप्रबोधादयः प्रत्येकगुणाः प्रकाशन्ते इति सर्वेषां अङ्गीकर्तव्यं भवति । यस्य यस्य यो यो विषय आवश्यकः तस्य तस्य स स सर्वोऽपि शास्त्रविषयः अस्मात्कवित्वाल्लब्धुं शक्यते ।

प्रस्तुते एष कविवरः स्वकाव्येषु विश्वकल्याणकारकान् उत्तमसन्देशान् व्यंग्यरूपेण यथा प्रकटीकृतवान् तत्प्रकटनरीतिप्रदर्शनमेव प्रस्तुतव्यासोद्देशः ।

पुरुषार्थेषु धर्म एव आद्यः । अस्य प्रभावेनैव सर्वमपि विश्वं सुस्थिररूपेण स्थातुं प्रभवति, 'ध्रियत इति धर्मः' 'धारणाद्धर्म इत्याहुः' एवमाद्याः 'धर्म'शब्दव्युत्पत्त्यर्थाः उक्तविषयमनुवदन्ति, एतादृशप्रभाव-

भासुरं 'धर्म' शिष्टावर्थकामौ यदा अनुसरतः, तदानीमेव तौ लोकश्रेयस्सम्पादनरूपेण विकासं प्राप्नुवतः । एतदनुरूपाः एतदुपनिषत्सूक्तीः श्रृणुत ।

"धर्मो विश्वस्य जगतः प्रतिष्ठा, लोके धर्मिष्ठं प्रजा उपसर्पन्ति, धर्मेण पापमपनुदति धर्मे सर्वं प्रतिष्ठितं, तस्मात् धर्मं परमं वदन्ति"

अत एव भारतीयस्मृतयः, स्वस्वविहितधर्माऽऽचरणं सर्वेभ्यः सर्वाभ्युदयसन्धायकमिति, अत एव सर्वेषां अवश्यमाचरणीयमिति च वारं वारं कणेहत्य वदन्त्येव । श्रुत्यर्थं सर्वात्मना अनुसरन्तं एवं स्मृतिप्रबोधं एष कविकुलगुरुः स्वरघुवंशकाव्ये दिलीपचक्रवर्तिनः शीलचित्रणसन्दर्भे एवं श्रावितवान् ।

स्थित्यै दण्डयतो दण्डयान् परिणेतुः प्रसूतये ।
अप्यर्थकामौ तस्यास्तां धर्मायैव मनीषिणः ॥

अत्र दिलीपराजेन्द्रः दण्डयान् शात्रवान् दण्डयन्, एतन्मुखेन दुष्टशिक्षणरूपं धर्मं स्थापयति ।

दुष्टशिक्षणाऽभावे राज्ञः नरकप्राप्तिरिति स्मृतिप्रमाणं श्रूयते । यथा–

"अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
अयशो महदाप्नोति नरकं चाऽधिगच्छति ॥"

एवमेवैष राजेन्द्रः विवाहसंस्कारे पत्नीस्वीकरणरूपेण साधनेन सत्संतानप्राप्तिरूपं धर्मं स्थापयति। मानवस्य सत्सन्तानाऽभावे पितृणात् न विमुक्तिः। अत्र श्रुतिः "प्रजया पितृभ्य एष वा अनृणः यः पुत्री..." अनेन भारतीयानां परिणयपरमार्थः, 'न केवलं भौतिकभोगाऽनुभवमात्र-

फलकः' इति स्पष्टं ज्ञायते । एवमत्र दिलीपस्य शत्रुजयपत्नीस्वीकरणरूपावर्थकामौ, धर्मसंस्थापने एव पर्यवस्यतः । यथाऽह गौतमः- 'यथाशक्ति धर्माऽर्थकामेष्वभ्यस्तेषु धर्मोत्तरः स्यात्' इति ।

'त्यागाय संभृतार्थानां ... प्रजायै गृहमेधिनाम्'

इत्येवंरूपं रघुवंशीयानां अर्थकामसेवनध्येयं, धर्मसंग्रहणमात्रफलकमिति कविरत्र सूचितवान् । एवमेतत्कवेः एतादृशधर्मसंग्रहणरूपशीलतायाः मूलं 'धर्मप्रजासम्पत्त्यर्थं स्त्रियमुद्वहे'दिति आपस्तम्बसूत्रार्थ एवेति निश्चप्रचम् । अत्र सूत्रे प्रथमतः धर्मसम्पल्लाभोऽभिलषितः, एतदनन्तरं प्रजासम्पल्लाभः ।

एवमेष कविशेखरः स्वकाव्येषु, भारतीयधार्मिकजीवितवैभवं वर्णयन् - एतद्वर्णनमिषेण लोकश्रेयःप्रदं कञ्चिदेकं महान्तं सन्देशं अस्मभ्यं निगूढं यथा प्रदत्तवान् यत् ।

## सार्वकालिकसन्देशाः

"स्वजीविताभ्युदयं, लोकाभ्युदयं च प्राप्तुकामैः प्राज्ञैः अर्थकाममूरुषार्थौ धर्ममूलकौ सन्तौ संसेवितव्यौ, यथा रघुमहाराजादिभिः तौ सेवितौ" इति । अर्थात् धर्मे यादृशी श्रद्धा, यादृशी आसक्तिः तादृशश्रद्धाऽऽसक्तिभिरेव अर्थकामौ सेवनीयौ, न केवले अर्थे कामे वा आसक्तिरुत्पादनीया । अत एवोक्तं-

"धर्मार्थकामास्सममेव सेव्याः । यो ह्येकसक्तस्स जनो जघन्यः।'' इति । कालिदासः, उपरि दर्शितं आपस्तम्बसूत्रोक्तं धर्मं पुनः स्वशाकुन्तले सार्थवाहवृत्तान्तवर्णनसन्दर्भे प्रकाशयामास । अत्र

शकुन्तलाऽवधीरणजनितस्य शोकस्य मूलं तस्य राज्ञः सन्तानाऽभाव एवेति ।

"....नूनं प्रसूतिविकलेन मया प्रसिक्तं
धौताऽश्रुशेषमुदकं पितरः पिबन्ति ॥"

इति दुष्यन्तवाक्येन व्यक्तं भवत्येव । अनेन वर्णनेन कवेस्सन्देश एवंविध इति ज्ञायते यत्

"उद्वाहोत्सवे स्त्रीपरिग्रहस्य परमोद्देशः पुत्रलाभ एव, येन कुलाभिवृद्धिः, पितृदेवतातृप्तिश्च जायेत । अतः सत्पुत्रलाभोद्देशेनैव स्वजीविताभ्युदयकांक्षिणा स्त्रीपरिग्रहः कर्तव्य इति । आपस्तम्बसूत्राऽऽशयोऽपि एष एव खलु ।

तृतीयः कामः प्रबलस्सन् यदा आद्यं धर्ममभिभवति, तदा भारतीयदाम्पत्यजीवितवृक्षस्य क्रिमिदष्टस्येव वृक्षस्य क्रमशः क्षैण्यं आपतति । परमार्थमेनं कालिदासः पार्वतीशकुन्तलाजीवितपरिणामविधानचित्रणे सम्यक् भासयामास । दुष्यन्तपरिग्रहानन्तरं शकुन्तलायाः धार्मिकजीवितं मदनः विफलमकरोत् । एष मन्मथप्रभावः दुर्वासश्शापकारणत्वेन, दुष्यन्तकर्तृकप्रत्याख्यानरूपत्वेन च परिणतः । एवमेव भौतिकसौन्दर्यगर्वितायाः पार्वत्यास्सविधे मन्मथदाहं, तपश्चरणानन्तरपरिणामं च वर्णयन् कवीश्वरः स्वकाव्यसन्देशमेवं श्रावितवान् यत् "आध्यात्मिकसौन्दर्यस्य पुरतः केवलभौतिकसौन्दर्याद्वारः तात्कालिकः सन् निस्सारः, निरर्थकश्च भवति । अतः दम्पत्योः सुस्थिरप्रणयसम्पादने तपश्चरणजनितसंयमनं, एतत् संयमनजनितविशुद्धप्रेमैव विश्वकल्याणसम्पादनाय, स्वजीवितचारितार्थ्याय च

प्रभवतीति । एतत् परमाशयेनैव कविः स्वशकुन्तलापात्रं चित्रितवान्, एतच्चित्रणसमये कविः केवलकामपुरुषार्थसेवनेन यावत्यः अनर्थपरम्पराः आपतन्ति, तासां प्रत्यक्षवर्णनं कृत्वा भारतीयपवित्रप्रणयवैभवे गुरुत्वमहत्त्वपटुत्वप्राभवानि कविः अद्भुतं यथा प्रदर्शितवान् ।

इतःपरं मानवानां दैनन्दिनजीवितेषु श्रेयःप्रदान् कालिदासीयसन्देशान् द्वित्रान् श्रावयितुकामः ।

प्रकृतिप्रेमरूपः उदारभावः पुरुषाऽपेक्षया स्त्रीष्वधिकं दरीदृश्यते, यतः मातृप्रेमप्लावितमासां हृदयम् । एतादृक्प्रकृतिप्रेम, मानवजीवितानि प्रकृतिजीवितेन साकं ग्रथ्नाति । एतत् प्रकृतिसहजीवनविधानं कालिदासीयगिरिजाशकुन्तलाजीवितयोः प्रस्फुटं प्रतिफलति । पश्यत –

"अतन्द्रिता सा स्वयमेव वृक्षकान् घटस्तनप्रस्रवणैः न्यवर्धयत् ।
गुहोऽपि येषां प्रथमाप्तजन्मनां न पुत्रवात्सल्यमपाकरिष्यति ॥"

(कुमारसम्भवम्)

तपश्चरणकाले गिरिजायाः एवं घनिष्ठं सहजं च प्रकृतिप्रेमैव पश्चात् विश्वप्रेमरूपेण परिणतं सत् एनां "जगन्मातृरूपगौरवपदे प्रतिष्ठापयामास । एवं प्रकृतिप्रेमपरवशकालिदासवर्णनप्रभावेण शकुन्तलापि भरतमातृपदमधिष्ठितवती । बाल्ये वयसि "पातुं न प्रथमं व्यवस्यति जलं वृक्षेष्वपीतेषु या, नाऽदत्ते प्रियमण्डनाऽपि प्रकृतिस्नेहेन या पल्लवम् ।" अत एवैषा कण्वतपोवनप्रकृतौ मुख्याङ्गत्वेन परिणता । अतः शकुन्तलां विना न कण्वतपोवनम् । कण्वतपोवनं विना न शकुन्तला । शकुन्तलां विना न कालिदासः । मृगा अपि परं पक्षि-

णोऽपि शकुन्तलावियोगं न तत्र सहिष्यन्ति। अहो! महाकवेः चराऽचरप्रकृतौ प्रकृतिप्रणयित्वप्राभवः। बहिःप्रकृत्यासाकं मानव-प्रकृतेः एतादृशघनिष्ठसम्बन्धः केवलसंस्कृतवाङ्मये, तत्राऽपि केवल-शाकुन्तलनाटके एव द्रक्ष्यामः। किंच दिलीपदम्पत्योः, वसिष्ठाश्रम-वासिनां रघुमहाराजस्य च प्रकृतिप्रेमवैभवं विश्वमोहनं यथा वर्णयन्नेष कविकुलगुरुः मानवलोकमेवं सुललितं प्रबोधितवान् यत् –

"मानवाः! चराऽचरप्रकृतिप्रेमभावेन विश्वमानवप्रेम्णा च मानवसेवां तन्मुखेन माधवसेवां च कुर्वतः मानवलोकं माधवलोकं यथा परिणमयितुं सज्जिता भवत" इति। एवं भव्यदिव्यप्रकृतिप्रणय-भावेन चराचरप्रपञ्चं दिव्यसौन्दर्यधामानं यथा कालिदासः परिणमयितु-कामः। कालिदासीयप्रकृतिवर्णनानां परमाशय एष एव।

किंच कालिदासीयकाव्यतपोवनानि पुण्यतपोवनानीव दर्श-पौर्णमासेष्ट्यादिषु पवित्राऽऽज्यधूमपरिमलवर्णनैः अधिकारिपाठका-ऽतिथीनां अन्तरङ्गाणि आमोदभरितानि कुर्वन्ति। अत्रविषये कालि-दासः स्वयं अध्वर्युपदमलंकृत्य रघुमहारजादिभिः विश्वजिद्यागादीनि कारितवान्।

एवं यथाविधि यागादिनिर्वहणेन 'मानवाः यूयं चित्तशुद्धिं सम्पाद्य तन्मुखतः यूयं मुमुक्षवः भूयास्त' इति तत्काव्यसन्देशः।

'कर्माणि चित्तशुद्ध्यर्थ'मिति हि आदिशङ्कराचार्याणामादेशः। एतादृशसत्कर्माचरणेनैव रघुमहाराजादीनां जीवितानि तथा महोज्ज्व-लानि लोकाराधनदक्षाणि च संवृत्तानि। एवं रघोः प्रजाहितजीवितं

च रघुकौत्सप्रसङ्गे प्रस्फुटं प्रकाशयामास कविः। एवं रघोः आदर्श-जीवनस्य सत्कर्माचरणप्राप्तचित्तविशुद्धिरेव अत्र मूलम् -

एवमेष जातीयमहाकविः स्वकृतिषु मूर्तित्रयाऽद्वैतवर्णनेन सर्वमतस्थेऽभ्यः सर्वाऽभ्युदयसन्धायकं सार्वकालिकसन्देशमेवं दत्तवान् यत् "सर्वमतस्थानां स्वीयानि विविधान्यर्चनानि एकमेव परात्परं प्राप्नुवन्ति। *अतस्सर्वमतस्थानां दैवतमेकमेव। अतः अन्यमतदैव-दूषणं, परमार्थतः स्वमतदैवदूषणप्रायमेव। अत एव एकस्य मतदैवं अन्यः न दूषयेत्। किन्तु भक्त्या स्वस्वदैवं अर्चयेत्। एवं यदि सर्वमतस्थान् भक्तान् समानाऽऽदरेण एक एव परमात्मा समुद्धरेत्। नैकोऽपि दुःखभाक् भवेत्। एवं सुकरेणैव जनाः सर्वेऽपि तितीर्षन्ति कष्टान्" इति। अन्यच्च स्वमेघदूते कविरेषः विजातीयस्य यक्षस्य-विरहं विश्वविरहवत् चित्रयित्वा एनं सन्देशं सूक्ष्मं श्रावितवान् यत्, 'सजातीय-विजातीयभेदरहितं यथा सर्वप्राणिनां सुखदुःखेषु स्वीयेष्विव सर्वे सहानुभूतिभावेन वर्तितव्य'मिति। एष सन्देशः विश्वमान-वतासन्देश इत्यत्र सार्वकालिक इत्यत्र च न कोऽपि विपर्यस्यति।

एवंविधं कालिदासः सर्वमानवेभ्यः सर्वदा सर्वाऽभ्युदयसम्पादकान् उत्तमोत्तमसन्देशान् सुललितसुन्दरसुमनोहररीत्या स्वकाव्यमुखेन सुनिपुणं श्रावयित्वा एवंरीत्या स्वकाव्यानि विश्वश्रेयस्सम्पादनविषये उत्तमसाधनान्यकरोत्। अत एव कालिदासः जातीयमहाकविगौरवं लब्ध्वा सर्वदेशीयानां कृतज्ञतायाः पात्रमभवत् इति शम्।

---

* "येऽप्यन्यदेवताभक्ताः यजन्ते श्रद्धयाऽन्विताः।
तेऽपि मामेव कौन्तेय! यजन्त्यविधिपूर्वकम्॥" (गीता)

# कालिदासकृतिषु सूक्तिमौक्तिकानि

कवेरेकस्य प्राशस्त्यनिर्णये तस्य लोकप्रियतानिर्णये च तत्कवेः कमनीयाः काव्यसूक्तयः मानदण्डा इव उपयुज्यन्ते । पाश्चात्य-प्रपञ्चे 'षेक्स्पियर्' महाकवेः कवितायाः यावत्यस्सूक्तयः पाश्चात्यै-स्सम्प्राप्ताः, तावत्यस्सूक्तयः अन्यपाश्चात्यकविकवितायाः न तैः सम्प्राप्ता इति तद्ज्ञानां निर्णयः । अत एव आंग्लकवेरेतस्य कविता-प्रसिद्धिः तथाविधस्सञ्जातः ।

एवमेव भारतदेशे 'षेक्स्पियरस्य' कालिदासमहाकवेः कवि-तायामपि सुमनोहरसुन्दरसुकुमारसूक्तयः — कवेः 'कविकुलगुरुत्व'-प्रकाशकाः विविधाः विराजन्ते । विविधलोकवृत्तप्रकाशकाः लोक-व्यवहारप्रकाशकाश्च नूनमियत्यस्सूक्तयः नाऽन्यकविकवितायाः भारतीयैः सम्प्राप्ता भवेयुः ।

कवेरेकस्य परिणतभावः, उक्तिचमत्कृतिः- कवितायां प्रसन्न-तादिगुणः, पदलालित्यं, भावरसपोषणं चेत्येवमादीनि सत्काव्यलक्ष-णानि तत्कवेः एकस्मिन् वाक्यगुच्छे यदा मिलन्ति, तदानीमेव ताट-ग्वाक्यम् 'लोकोक्तिपदभाजनं सत् बहुजनानां आस्यरङ्गेषु अप्रयत्नं नृत्यति । लोकस्वभावभासकानि एतादृशान्येव वाक्यानि सर्वैः सर्वदा सादरं समाद्रियन्ते । एतादृश्य एव सूक्तयः पाठकानां विविधविज्ञानप्रदानदक्षाः ।

एवं भारतीयसंस्कृतिसर्वस्वसम्प्रकाशकाः कालिदासीयाः काश्चन सूक्तयः, भव्यभावप्रकाशैः मौक्तिकानीव भ्राजमानाः प्रस्तुतेऽत्र लेखे संग्रहेण प्रदर्श्यन्ते ।

"गिरिजा, परिणययुक्तवयस्काऽपि वरान्वेषणविषये पिता हिमवता तूष्णींभाव आश्रितः" इति सन्दर्भे कविकुलगुरुरेवं वदति ।

'ऋते कृशानोः नहि मन्त्रपूतमर्हन्ति तेजांस्यपराणि हव्यम्'

(कु० सं० १-५१)

मन्त्रपूतं होमद्रव्यं स्वीकर्तुं अग्निं विना इतरतेजांसि यथा नार्हन्ति तथा, पार्वतीपरिग्रहणाय ईश्वरं विना इतरदेवताः न प्रभवन्ति । अतः हिमवतः तूष्णींभावो युक्त एव । अनया सूक्त्या गिरिजायाः आजन्मविशुद्धत्वसतीत्वादयः कविना सम्प्रकाशिता अभूवन् । एवं-

सन्दर्भः — स्वस्य तपोविघ्नकारिणीं गिरिजापरिचर्यां ईशः कथमियेष इतिसन्दर्भे कविः -

'विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः'

(कु० सं० १-५९)

लोके मानवानां मानसिकविकारोत्पादनाय पुष्कलसामग्र्यां सत्यामपि यस्य मनः न प्रचलति स एव 'धीर'शब्दवाच्यः । लोके मनोदौर्बल्यरूपाऽऽमयात् कांश्चन परित्रातुं सूक्तिरेषा चिन्तामणिकल्पा कविना प्रदर्शिता ।

सं- तारकाऽसुरबाधां स्वनिकटे प्रकटयतः देवान्प्रति ब्रह्मणो वचनम्-

'शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जनः' (कु० सं० सर्गः २)

'शठे शाठ्यं समाचरेत्' इति चाणक्यनीत्यनुसारिणी एषा सूक्तिः । अत्र दुर्जनस्वभावसम्प्रकाशनपूर्वकं, दुर्जनविषये इतरेषां प्रवर्तनरीतिः अनया सूक्त्या सम्प्रदर्शिता आसीत् ।

एवंविधसूक्तिपठनेन पाठकानां लौकिकविज्ञानप्राप्तिः स्वप्रवर्तन-

संस्करणं च जायते । 'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतर-क्षतये ....' इति आलङ्कारिकसूक्त्या लोकव्यवहारप्रबोधनमपि महा-काव्यप्रयोजनं भवति । एवम् -

सं :- 'सर्वानितरसदस्यान् विहाय इन्द्रस्य नेत्रसहस्रं युगपत् केवलं मदने पपात ।' इति कथनसन्दर्भे कविः "प्रयोजनाऽपेक्षितया प्रभूणां प्रायश्चलं गौरवमाश्रितेषु" (कु० सं० ३-१)

स्वार्थभावपूरितानां राज्ञां स्वभावः अत्र सूक्तौ दर्पण इव सन्द-र्शितः कविना । 'वाराङ्गनेव नृपनीतिरनेकरूपा' इति सुभाषितात् । 'राजसु न विश्वस्तव्यम्' इत्येवंरूपः प्रबोधोऽपि अत्र व्यंग्यरूपेण कविना सूचितः । एवम् -

सं :- नमस्कुर्वन्तीं गिरिजांप्रति ईश्वरस्याशीस्सन्दर्भे-

'नहीश्वरव्याहृतयः कदाचित् पुष्णन्ति लोके विपरीतमर्थम्'

(कु० सं० ३-३६)

इन्द्रियनिग्रहवतां भाषितं न कदाऽपि विरुद्धार्थं जनयतीति कथयता कविना अत्र महात्मनां स्वभावः प्रभावः विश्वसनीयतादयश्च-प्रस्फुटं प्रकाशिताः । एवम् -

सं :- 'स्वस्य मदनविकारकारकं मदनं शपन् ब्रह्मा धर्माऽऽख्येन याचितस्सन् मदनस्य शापान्तमपि सत्वरं प्रददौ' इति सन्दर्भे-

"अशनेरमृतस्य चोभयोः वशिनश्चाम्बुधराश्च योनयः ॥"

(कु० सं० ४-४३)

यथा युगपत् अशनिपातनजलप्रदानयोः मेघाः समर्थाः । एवं युगपत् शापानुग्रहयोः प्रदाने वशिनः पुरुषास्समर्थाः । अनेन सुभाषि-

तेन, इन्द्रियनिग्रहवतां स्वभावप्रभावसामर्थ्यादयः लोकाय यथावत् प्रदर्शितप्राया अभवन् । एतादृशसुभाषिताऽर्थज्ञानेन वशिनां विषये सामान्यजनानां भयभक्तिमिलितादरभावः पूज्यभावश्चोदेति । एवं लोक-संस्करणं कालिदासकाव्यानां सुकरमेव सम्भवति ।

सं :- 'तपश्चरन्त्याः गौर्यास्सविधे महर्षयोऽप्यागता' इति कथनसन्दर्भे कविवचनम् ।

"न धर्मवृद्धेषु वयस्समीक्ष्यते" (कु० सं० ५-१६)

"युवत्यः युवका अपि धर्मशास्त्रादिविज्ञानभारेणैव 'वृद्धाः' परिगण्यन्ते, नतु पलितकेशत्वादिवृद्धलक्षणैः । अत एव मनुधर्मशास्त्रे-

"न तेन वृद्धो भवति येनाऽस्य पलितं शिरः ।
यो वै युवाप्यधीयानः तं देवाः स्थविरं विदुः ॥"

अनेन युवतीयुवकाः एवं प्रबोध्यन्ते यत् 'बाल्यात् प्रभृति उत्तमविज्ञानसम्पादनेन युवकाः ! यूयं मान्यानामपि माननीयाः भवत ।' इति एवम् -

सं :- महेश्वरमनादृतवन्तं कुहनाबटुं प्रति गिरिजावाक्यम्,

'न कामवृत्तिर्वचनीयमीक्षते' (कु० सं० ५-८२)

लोकाऽपवादात् भीत्यभावादिरूपः स्वेच्छाव्यापारवतां स्वभावः, अत्र सूक्तौ सम्प्रकाशित आसीत् । एवम्-

'न केवलं यो महतोऽपभाषते, शृणोति तस्मादपि यस्स पापभाक् ।'
(कु० सं० ५-८३)

महात्मन उद्दिश्य प्रवर्तमानानि निन्दावचनानि न केवलं निन्दावादिनं, अपितु श्रोतारमपि पापिनं कुर्वन्ति । अनेन भाषितेन,

गुरुनिन्दाकरणश्रवणादिः कर्तुः श्रोतुश्च महाऽनर्थकारीति कविना सूचितम् । बाल्ये एव वयसि विद्यार्थिनां निर्मलचित्तेषु एतादृशो-त्तमभावबीजाऽवापनक्रियेति यत् तत् क्रमशः कुसुमितस्तबकितफलि-तत्वादिपरिणामैः तान् बालान् गुरुभक्तिभावभरितान् करोति । एवम्-

"विक्रिया न खलु कालदोषजा निर्मलप्रकृतिषु स्थिरोदया"

(८-६५)

केनचित् कालपरिणामेन जातो विकारः निर्मलप्रकृतिषु चिरं न स्थास्यति । यथा, स्वतः धवलप्रकृतिश्चंद्रः उदयरागेण तत्काले रक्तोऽपि पुनः अचिरादेव स्वीयां धवलशोभां प्राप्नोत्येव ।

इतःपरं रघुवंशमहाकाव्यात् काश्चन सूक्तयः श्रोतव्याः -

सं :- नन्दिनीपूजाव्यतिक्रम एव दिलीपस्य सन्तानप्रतिबन्धक आसीत् इति वसिष्ठवचनसन्दर्भे-

"प्रतिबध्नाति हि श्रेयः पूज्यपूजा व्यतिक्रमः" (रघु० १-७९)

पूज्येषु विषये जातोऽनादरभावः अनादृतवतः जीविताऽभ्युद-यस्य नूनं प्रतिबन्धरूपः परिणमति । अतः 'पूज्याः न कदाऽपि निराकर्तव्याः' इति महान् प्रबोधः अत्र कविना व्यंग्यरूपेण कृतः ।

सं :- गुरूपदेशग्रहणकाले रघोः ग्रहणशक्तिसौलभ्यं कथयता कविना एवमुक्तम् ।

"क्रियाहि वस्तूपहिता प्रसीदति" (रघुवंशे ३-२९)

उत्तमशिष्याय प्रदत्तः गुरुप्रबोधः शीघ्रं फलोन्मुखो भवति । अतः उत्तमशिष्येभ्यः एव प्रदत्ता विद्या लोकक्षेमकरा परिणमति । तद्व्यतिरिक्ता तु लोकक्षामकरेति परिशेषन्यायप्राप्ता एव खलु ।

सं :- रघुजैत्रयात्राकाले 'रघुं शरणंगताः शत्रवः सुखेन अवसन्' इति सन्दर्भे कविवचनम्-

'प्रणिपातप्रतीकारस्संरम्भो हि महात्मनाम्' (रघुवंशे)

महात्मनां कोपः शत्रुविषयकः, शत्रूणां प्रणामसमर्पणाऽवधिकः । अर्थात् शत्रूणां अवलेप एव महात्मनां कोपजनकः; किन्तु न तेषां सुखजीवनम् । एवंविधविविधमानवप्रवृत्तिपरिज्ञानेन पाठकानां सामाजिकजीवने उत्तमपौरत्वसिद्धिस्सञ्जायते । धार्मिकजीवनलाभश्च ।

सं - 'रघुमहाराजः शत्रुभ्यः संगृहीतं धनं स्वविश्वजिद्यागे अर्थिभ्यः सर्वस्वदक्षिणारूपेण विनियुक्तवान्' इतिसन्दर्भे कवेस्सूक्तिः ।

'आदानं हि विसर्गाय सतां वारिमुचामिव' (रघु० ४-८६)

'घन'शब्दवाच्यैः मेघैः आर्जितं सर्वमपि जलधनं पुनः प्रजानामेव भूत्यर्थं वर्षरूपेण तैः यथा विनियुज्यते तथा सज्जनैः आर्जितं सर्वविधमपि धनं लोकोपकारायैव विनियुज्यते । अहो ! घनानां परश्रेयस्सम्पादने परमा प्रीतिः । अनेन उदारभावानां स्वीयप्रवृत्तिः लोकाय सन्दर्शिता । एवम् -

सं :- 'विश्वजिद्यागे सर्वस्वदक्षिणाप्रदानकारणेन निस्स्वस्य रघुमहाराजस्य दरिद्रतापि श्लाघ्यतरा भवति' इतिसन्दर्भे कवेस्सूक्तिरेषा ।

'पर्यायपीतस्य सुरैर्हिमांशोः कलाक्षयः श्लाघ्यतरोहि वृद्धेः ॥'

(रघु० ५-१६)

शुक्लपक्षे देवेभ्यः स्वकलाप्रदानकारणेन जातः चन्द्रस्य कलाक्षयः, तत्कलाभिवृद्धेरपि श्लाघ्यतरो भवति । अत एवोक्तं भर्तृहरिमहाकविना स्वसुभाषितत्रिशत्याम् -

श्लो।। 'मणिश्शाणोल्लीढः समरविजयी हेतिदलितो
मदक्षीणो नागः शरदि सरिदाश्यानपुलिना ।
कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता
तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नराः ॥' इति ।

इतःपरं मेघसन्देशकाव्यात् द्वित्रास्सूक्तयः —

"कामार्ता हि प्रकृतिकृपणाः चेतनाऽचेतनेषु"

मदनार्तिपीडिताः मानवाः युक्ताऽयुक्तविवेकविहीनाः भवन्ति । अतः 'हे पाठकोत्तमाः ! भवन्तः युक्तायुक्तविवेकविलसितास्सन्तः लोकश्रेयस्सम्पादने बद्धकटयो भवत' इत्येवंरूपोऽत्र व्यंग्यप्रबोधः ।

"याच्ना मोघा वरमधिगुणे नाऽधमे लब्धकामा" (मेघसं० १-६)

गुणिनमुद्दिश्य कृता याचना व्यर्थाऽपि स्पृहणीया एव भवति । अधमयाचना तु सफलाऽपि न स्पृहणीया । अतः हे याचकाः ! गुणिनमेव याचयेत । यथा चोक्तं अप्रस्तुतप्रशंसालङ्कारे —

"एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते" (चन्द्रालोके)

"रिक्तस्सर्वो भवति हि लघुः पूर्णता गौरवाय" (१-२०)

पूर्णत्वसम्पादनमेव सर्वस्याऽपि गौरवप्रदम् । नतु रिक्तत्वम्— निर्धनः सर्वैः लघुतया दृश्यते । अतः धनवता भाव्यं सर्वेण, दुर्बलः लघुर्भवति । अतस्तादृशः वातादिभिः (रोगैः) चाल्यते, नतु बलवान् । अत्र विशेषः— अनारोग्यवतः पुरुषस्य वमनकरणाऽऽदिभिः गर्भे 'रिक्तता' जायते । ततः कषायसेवनेन लघुत्वं, क्रमशः बलं च जायते । मानवानां शारीरकबलमेव पूर्णत्वप्रदं खलु ।

एवंविधपूर्णत्वलाभेन वाताधिक्यादयः न सम्भवन्ति । एवम् -

"आपन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् ॥" (१-५७)

मेघं प्रति यक्षवचनमेतत् । हे मेघ ! मध्ये मार्गे यदि दावाऽग्निः उपयुक्तवस्तूनि दहन् दृश्यते, तं प्रशमय्यैव पुरस्तात् गच्छ । यतः उत्तमानां सम्पदः आपन्नानां आर्तिहरणायैवोद्दिष्टाः । यथा भारतीयोत्तमनायकानां महात्मादीनां विज्ञानशक्त्यादिसम्पदः देशीयार्तिहरणाय, शरणाऽर्थिनां संरक्षणाद्यर्थं च विनियुक्ता आसन् । विषयस्याऽस्य भारतेन्दिरायाः प्रवर्तनमेव प्रमाणम् ।

अथ शाकुन्तलादुदाहृतिः –

"प्रायः स्वं महिमानं क्षोभात् प्रतिपद्यते हि जनः"

स्वस्य क्षोभसमय एव सर्वः स्वं स्वं स्वभावं प्रदर्शयति । सत्यमेवैतत् । पाकसैन्यानां निष्कारणवैरित्वकारणेन भारतस्य क्षोभकाले सम्प्राप्ते, भारतीययुद्धवीराः स्वप्राणांस्तृणाय मन्यमानाः युद्धमकुर्वन्; भारतेन्दिरायाश्च स्वीयं प्रभावं प्रपञ्चे अघोषयन् ।

उक्तरीत्या तत्तत्सन्दर्भेषु प्रयुक्ताः अर्थान्तरन्यासाऽलङ्काररूपाः कालिदासीयाः कमनीयमहनीयास्सूक्तयः विविधलोकविज्ञानप्रदाने सर्वसमर्थास्सत्यः ऐहिकाऽमुष्मिकयोः मानवजीविताऽभ्युदयसाधकाः अत एव सर्वेषां स्वजीविताऽभ्युदयकांक्षिणां शिरोधार्याश्च भवन्ति ।

—

# कालिदासकृतिषु श्रौतविज्ञानवैभवम्

"कविकुलगुरोः काव्यतपोवनानि यज्वनां पुण्यतपोवनानीव दर्शपौर्णमासेष्ट्यादीनां पवित्राऽऽज्याऽऽहुतिधूमादिवर्णनाऽऽमोदैः पाठकाऽतिथीनां चित्तानि बहिः, आभ्यन्तरं च पावयन्ति" इत्यत्रविषये बहूनि निदर्शनानि अस्य कवेः काव्येषु दृश्यन्ते । पश्यत । (रघुवंशे सर्गः १-५३)

"अभ्युत्थिताऽग्निपिशुनैरतिथीनाश्रमोन्मुखान् ।
पुनानं पवनोद्धूतैर्धूमैराहुतिगन्धिभिः ॥"

अतः वयमेकवारं तत्कालिदासकवेः पूतं काव्यतपोवनं प्रविश्य, तत्रत्यपवित्रश्रौतक्रियाऽवलोकनेन अन्तर्बहिश्चास्मान् पावयिष्यामः ।

श्रौतक्रियावर्णनसन्दर्भे समुपस्थिते श्रौतकविरेषः एकेन विशेषणेन उपमानेन वा स्वीयां श्रौतक्रियानिर्वहणदक्षतां तत्संप्रदायविशेषांश्च भासयत्येव । यथा -

"वनान्तरादुपावृत्तैः समित्कुशफलाहरैः ।
पूर्यमाणमदृश्याग्निप्रत्युद्यातैस्तपस्विभिः ॥" (रघु० १)

"प्रवासात्प्रतिनिवृत्त्य स्वाऽग्निशरणमागच्छद्भिः आहिताग्निभिः स्वत्रेताग्निभ्यः पुत्रकल्पेभ्यः भक्ष्यस्थानीयानि समित्कुशफलानि आनीतव्यानि । यतः एतत्समित्कुशफलार्थं त्रेताग्नयः (इतरेषां) अदृश्यरूपेण आगतान् आहिताऽग्नीन् प्रत्याऽगच्छन्ति ।" एनमेव श्रौतसम्प्रदायं आपस्तम्बश्रौतसूत्रव्याख्या एव विशिनष्टि ।

"यथा हवा इतं (प्रत्यागतं) पितरं प्रोषिवांसं पुत्राः प्रत्या-

धावन्ति । एवग्ं हवावा एतमग्नयः प्रत्याधावन्ति । सशकलान् दारूणि वाऽऽहरन्तेति । यथैव तत्पुत्रेभ्य आहरन्तेति तादृक्तदिति विज्ञायते ।" (आपस्तम्बश्रौतसूत्रम्- ६ प्रश्नः ७ पटलः ४-१३-१४००)

किंच अग्नीनां अदृश्यरूपेण आगमनविषयं विशदयन् मल्लिनाथसूरिमहाशयः स्वसंजीविन्यां एवमकथयत् ।

"प्रोष्य आगच्छतां आहिताग्नीनां अग्निप्रत्युद्यानं श्रुतिप्रसिद्धमेव"

श्रुत्यर्थमेनं अत्र उक्तश्रौतसम्प्रदायेन मेलयित्वा कविर्वसिष्ठाऽऽश्रमवर्णनमिषेण प्रकाशयामास ।

एवमेव कालिदासर्षिः स्वेन संवर्धितां शकुन्तलां पतिगृहं प्रेषयन् तामादौ स्वत्रेताऽग्निसन्निधिमानाय्य, एवं ऋक्छन्दसा आशास्ते ।

"अमी वेदिंपरितः क्लृप्तधिष्ण्यास्समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः ।
अपघ्नन्तो दुरितं हव्यगन्धैः वैतानास्त्वां वन्हयः पावयन्तु ॥"

(अंकः ४-९)

अत्र श्लोके प्रयुक्तानि 'क्लृप्तधिष्णि' 'प्रान्तसंस्तीर्णदर्भ' 'वैतानाऽग्नि' 'वेदि' प्रभृतिपदानि केवलं आहिताऽग्निमुखादेव उद्भवन्ति । यथा केषांचिन्मन्त्राणां भरद्वाजादिमहर्षयः अधिपतयः, एवमत्राऽपि अस्य ऋक्छन्दसः अधिपतिः कालिदासमहर्षिः भवतीत्यत्र न कश्चित्सन्देहः । अत्र त्रेताऽग्नीनां निधानरूपं 'वेदि'स्वरूपं पाठकेभ्यः प्रत्यक्षं सन्दर्शयितुकाम इव कविः अत्र एवं वर्णितवान् । श्रौतक्रियासु

क्षुण्णमभ्यस्त आहिताऽग्निः नूनमनयैवरीत्या वेदिं परितः समि-त्कुशादीनामासादनं करोति । परमार्थतः महाकविरेषः श्रौतक्रिया-निर्वहणे अतिनिपुणः । यतः स्वयं अध्वर्युस्थानं स्वीकृत्य रघुमहा-राजादिभिः विश्वजिद्यागादीनि कारयितवान् खलु । अपरं च वेदि-पदार्थं प्रत्यक्षतया प्रदर्शयितुकाम इव "मध्येन सा वेदिविलग्नमध्या" इति पार्वत्याः मध्यस्थानं कविर्वर्णितवान् ।

एवं दिलीपमहाराजस्य 'सुदक्षिणा' नाम पत्नी आस्ते इति सन्दर्भे श्रौतोपमानेन तद्दक्षिणायाः प्रभावं एवं सूचितवान् ।

"पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा" (रघु० १-३१)

अत्र प्रयुक्तमेतदुपमानम्- 'यज्ञो गन्धर्वस्तस्य दक्षिणाप्सरसः' इत्येनं श्रुत्यर्थं स्मारयति । अस्यार्थः, यज्ञरूपस्य गन्धर्वस्य दक्षिणारूपा पत्नी प्राऽवर्तत । अर्थात् दक्षिणारहितो यज्ञः, पत्नीरहितः पतिवत् निस्तेजस्कः मृतप्रायश्च भवति । अत एवोक्तं- 'मृतो यज्ञस्त्वदक्षिणः' इति । एवं अत्र कविना प्रयुक्तं उपमानं, कवेः श्रौतविज्ञानवैभवं तत्सम्प्रदायज्ञत्वं च विवृणोति ।

वसिष्ठसन्निधौ स्वस्य अनपत्यताजातां व्यथां वदतः दिलीपस्य वक्ष्यमाणमेतद्वचनं रघुवंशकाव्ये-

"असह्यपीडं भगवन् ऋणमन्त्यमवेहि मे ... ।"

(रघु० १-७०)

अत्र कविः 'अनपत्यता' इत्यर्थे 'अन्त्यं ऋणम्' इति पदद्वयं प्रयुज्य अत्र श्रौतसम्प्रदायमन्यं प्रदर्शयामास । यथा ब्राह्मणः जन्म-नैव ऋणत्रयेण सहितस्सञ्जायते । तेषु प्रथमं ऋषिऋणं, द्वितीयं

देवऋणं, तृतीयं पितृणं चेति । एतदृणाऽपनोदनाय समर्थानि साधनान्येव विहितानि । यथाविधि ब्रह्मचर्यव्रतनिर्वहणेन विप्रबालः ऋषिऋणात् विमुक्तो भवति । एवं यथाशास्त्रं यज्ञक्रियानिर्वहणेन स देवऋणात् त्याजितो भवति । एवमेव यथाश्रुति सत्सन्तानप्राप्त्या द्विजः पितृणात् मुक्तो भवति । यजुर्वेदमन्त्रमेनं शृणुत । "जायमानो वै ब्राह्मणः त्रिभिर्ऋणवा जायते, ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणः यः पुत्री यज्वा ब्रह्मचारिवासी...." श्रुत्यर्थस्याऽस्य प्रकाशनायैव महाकविरत्रश्लोके 'अन्त्यं ऋणं' इति प्रयुक्तवानित्यत्र न काऽपि संशीतिः । श्रौतभावमेनमेष श्रौतकविः रघुवंशे अन्यत्र पुनः इत्थं चमत्कृतवान् ।

"न संयतस्तस्य बभूव रक्षितुः विसर्जयेद्यं सुतजन्महर्षितः ।
ऋणाभिधानात् स्वयमेव केवलं तदा पितॄणां मुमुचे स बन्धनात् ॥"
(३-२०)

दिलीपस्य पुत्रस्सञ्जातः । पुत्रोत्सवसन्दर्भे पित्रा चक्रवर्तिना कारागारबद्धाः विमोचनीयाः । महाराजानां समुदाऽचार एषः । अथाऽपि रामराज्यकल्पे दिलीपसाम्राज्ये न कोऽपि अपराधी कारागारबद्धो दृश्यते ? तर्हि कं राजा विमोक्ष्यति ? कथमत्र समुदाऽऽचारनिर्वर्तनम् ? हाँ ! सुसन्दृष्टः कश्चिदुपायः । पुत्रोदयात्प्राक् दिलीप एव स्वयं पितृणरूपे बन्धे बन्धितः खलु । अतः बद्धं स्वात्मानमेव राजा अद्य पुत्रोदयसमये बन्धात् पितृणरूपात् विमोचयितवान् । एतावता अत्र वक्तव्योऽर्थः एतावानेव यत् सुपुत्रोत्पत्त्यनन्तरमेव राजा उक्तश्रुत्यनुसारं पितृऋणात् विमुक्त आसीत्

इति । हाँ कियती कवेः भावशिल्पचातुरी ! कियान् कविप्रतिभाभाः ! अत्र सामान्योऽप्येष भावप्रकाशः कविप्रतिभाम्बरे विद्युत् प्रकाश इव विद्योतते ।

एवं प्रवासादागतेन कण्वर्षिणा स्वशिष्यः कल्ये वेलोपलक्षणार्थं आदिष्टः । स शिष्यः स्वप्नात् प्रतिबुध्य यदा बहिरागतः तदा एकत्र दिशि (पश्चिमे) चन्द्रः अस्तमेति । पूर्वस्यां दिशि सूर्यः अनूरुणा सह उदेति । एवं युगपत् सूर्याचन्द्रमसोः उदयव्यसनरूपाभ्यां कारणाभ्यां लोकं प्रबोधयन्निव कालिदासः शिष्यमुखेन एवं कथयति ।

शिष्यः- वेलोपलक्षणार्थं (कण्वर्षिणा) आदिष्टोऽस्मि ! हन्त ! प्रभातमासीत् ।

"यात्येकतोऽस्तशिखरं पतिरोषधीनाम्
आविष्कृतोऽरुणपुरस्सर एकतोऽर्कः ।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवाऽऽत्मदशान्तरेषु ॥" (शाकुन्तलम्)

अनेन लोकप्रबोधरूपेण कवेः वर्णनेन श्रौतविषयकः, सम्प्रदायान्तरप्रकाशनरूपः लाभोऽपि प्राप्तः । यथा उक्तवर्णनसन्निवेशः पौर्णमास्यामेव दृश्यते । शिष्यवचनाऽनुसारं ('उपस्थितां होमवेलां ...') सूर्योदयाऽनन्तरमेव पौर्णमासेष्टिः आरब्धव्या इति ज्ञायते । 'उदिते जुहोति' 'प्रागुदयादमावास्यायाः तन्त्रं प्रक्रमयति' इति विधिवाक्यदर्शनात् । एवं प्रस्तुतकथासन्निवेशैस्सार्धं विशिष्टश्रौतविषयाणामपि समावेशनं कालिदासकाव्येष्वेव सुलभम् । उक्तसन्निवेशे

श्रौतरहस्यप्रकाशनार्थमेव एष श्रौतविज्ञानचणः कविः शिष्यप्रवेशं (केवलं एतदर्थमेव) कृतवान् । एवम्-

पार्वतीदेव्यासह स्वस्य परिणयेच्छां प्रकटयन् महेश्वरः सप्तर्षीन् इत्थं कथयति ।

''अत आहर्तुमिच्छामि पार्वतीमात्मजन्मने ।
उत्पत्तये हविर्भोक्तुः यजमान इवाऽरणिम् ॥'' (कुमारसंभवे ६-२८)

आहिताग्निः अरणावेव यज्ञाग्निं (मथनं कृत्वा) उत्पादयति । सोऽग्निः यज्ञकर्मणि यथाविधि हुतस्सन् 'यज्ञाद्भवति पर्जन्यः' इति निदर्शनानुसारं वर्षाय, क्रमशः सस्यसम्पदे च हेतुर्भवति । एवं अत्र अरणिः यजमानसंकल्पश्च यथा क्रमशः लोककल्याणाय कारणे भवतः तथैवात्र सोमयाजिकल्पो महेश्वरः, (सोमयाजीचेत्यष्टमूर्तयः) अरणिकल्पा अगराजपुत्री, महेश्वरस्य तस्यास्सम्पादनयत्नश्चेत्येते क्रमा- लोककल्याणाय प्रभवन्तीत्यत्र न कोऽपि सन्देहलेशः । अपि चाऽत्र कालिदासकवेरुपमानमहिम्ना पार्वतीरूपाऽरणेः उत्पत्स्यमानं कुमारस्वामि-रूपं तेजः नूनं यज्ञाग्निकल्पमेवेति वक्तव्यम् । एषोऽग्निः लोककण्टकं तारकासुरं निहत्य क्रमशः लोकश्रेयस्सम्पादयिष्यति । एवं पार्वती-परमेश्वरयोस्सङ्गमः अनेकविधैः लोकश्रेयःप्रदो भवतीत्येतत्सर्वं अत्र श्रौतसम्बन्धिना उपमानेनैव निष्पन्नं भवति । एवं अरण्युद्भवोऽग्निः लोके दुष्टशक्तीः निष्कास्य तद्द्वारेण लोकसुभिक्षाय साधनं भवतीति ज्ञायते । अत एवोक्तं तैत्तिरीयब्राह्मणे । शृणुत तन्मन्त्रम् —

'यज्ञोरायो यज्ञईशे वसूनाम् । यज्ञस्सस्यानामुतसुक्षितीनाम् ।
यज्ञ इष्टः पूर्वचित्तिं ददातु .... '

तैत्तिरीयसंहितायां च एवमुक्तम्- (२-५-५)

'सौम्या खलु वा आहुतिर्दिवो वृष्टिं च्यावयति ...' (२-४)

'अग्नौ प्राप्ताऽऽहुतिस्सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिः' एवं श्रौतक्रियानिर्वर्तनेन सर्वस्याऽपि लोकस्य ऐहिकामुष्मिकेषु क्रमशः श्रेयस्सम्प्राप्तिरिति । कविकुलगुरुः एवंविधवर्णनैः कांतासम्मितत्वरीत्या एवं ज्ञापयति, व्यंग्यरीत्या मानवलोकमेवं प्रबोधयति च- यत् मानवाः ! स्वस्वविहितसत्कर्माचरणेन चित्तशुद्धिं सम्पादयत । यतः- 'कर्माणि चित्तशुद्ध्यर्थम्' इति सूक्तेः । श्रौतकर्माऽऽचरणेन उक्तरीत्या वर्षापातः, सस्यसमृद्धिश्च सञ्जायते । अत एवं ऐहिकश्रेयस्सम्प्राप्तिः । एवं सत्कर्माऽऽचरणं आमुष्मिकाय श्रेयसे च प्रभवति । यथा सत्कर्माचरणेन चित्तशुद्धिः, चित्तशुद्ध्या तत्त्वज्ञानोदयः, ज्ञानोदयेन मोक्षप्राप्तिश्च जायते । 'ज्ञानादेव तु कैवल्यं' इति सूक्तेः । 'स्वयं तीर्णः परांस्तारयति' इति आभाणकेन कारणेन स्वयंतीर्ण एव मानवः परांस्तारयिष्यति । अतः स्वयं लोकाय आदर्शत्वं प्राप्य सत्कर्माचरणेन स्वतः लोकक्षेमं सम्पाद्य अन्यानप्येवं प्रोत्साहयत ।

'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । ...' इति गीतावचनात् । एवंविधेनैव प्रवर्तनेन मानवजन्मनां चारितार्थ्यसिद्धिः सम्भवति ।

उपर्युक्तरीत्या कविकुलगुरोः श्रौतसम्प्रदायवर्णनेन कवेरस्य श्रौतकर्मविज्ञानं, सत्कर्माऽऽचरणासक्तिः, एवं लोकश्रेयस्सम्पादनाऽभिलाषश्च व्यक्तमेव । अतः पाठकोत्तमाः ! कालिदासकाव्याध्ययनेन लोकसेवाभाग्यं माधवसेवाभाग्यं च भजत ।

# कालिदासकृतिषु धर्मशास्त्रप्रबोधः

''धर्मो विश्वस्य जगतः प्रतिष्ठा'' (उपनिषत्सूक्तिः)

सर्वस्याऽपि प्रपञ्चस्य आधारहेतुः 'धर्म' एवेति उक्तसूक्ते-
ाशयः । 'धर्म'शब्दस्य अवयवार्थोऽपि आशयमेनमाविष्करोति ।

'ध्रियते इति धर्मः' 'धारणात् धर्म इत्याहुः' इति ।

एवं अखिलविश्वस्याऽऽधारभूते 'धर्मे' मानवानां अभिरुचिकल्प-
ाऽर्थं 'काव्यश्रीरेव सर्वसमर्था भवतीति प्रतापरुद्रीयाऽऽख्ये आलङ्का-
रिकग्रन्थे एवमुक्तम् ।

''यद्वेदात् प्रभुसम्मितादधिगतं शब्दप्रधानाच्चिरम्
यच्चाऽर्थप्रवणात् पुराणवचनादिष्टं सुहृत्सम्मितात् ।
कान्तासम्मितया यया सरसतामापाद्य काव्यश्रिया
कर्तव्ये कुतुकी बुधो विरचितस्तस्यै स्पृहां कुर्महे ॥''

अवश्यकर्तव्ये धर्मपालनाऽऽदिकार्ये मानवानां स्वतः प्रवृत्ति-
संकल्पनार्थं वेदपुराणवचनाऽपेक्षया सत्काव्यवचनानामेव यतः प्रभावा-
ऽऽधिक्यं दृश्यते; अतः तादृशकाव्यश्रियै वयमभिलषामः ''एतादृश-
काव्यानां विश्वश्रेयस्साधनतां प्रदर्शयन् 'वागनुशासन' बिरुदभूषितः
नन्नयभट्टारकमहाकविः' 'आन्ध्रशब्दचिन्तामण्यां' 'विश्वश्रेयः काव्यम्'
इति सूचितवान् । एतावता विश्वश्रेयस्सम्पादनाय स्वस्व 'धर्मपालनं'
मूलं भवति ।

एतादृशधर्माः भारतीयमहर्षिभिः 'सम्प्रदाय'नाम्ना अस्म-
दाचारव्यवहारैस्साकं संयोजितास्सन्ति । अत एवोक्तम्-

'आचारः परमो धर्मो नृणां कल्याणकारकः' इति। एवं स्वधर्मः-सर्वेषां कल्याणप्रदः- स्वप्राणेभ्योऽप्यधिकतरं संरक्षणीयः इति- 'स्वधर्मे निधनं श्रेयः परधर्मो भयावहः' इति गीतासूक्तिः (३-३५) गायति।

यत्र धर्मरक्षणं तत्र विजयप्राप्तिः, यत्र धर्मत्यागः तत्र अपजयप्राप्तिरिति रामरावणयोः, पाण्डवकौरवयोः, प्रस्तुते भारतपाकिस्थानयोश्च युद्धचरितानि सुस्पष्टं बोधयन्त्येव। अतः 'धर्मरक्षणम्' नाम मानवानां कृते आत्मरक्षणमेवेति कण्ठेहत्य कथितुं पारयामः। अत एवोक्तम्- "धर्मो रक्षति रक्षितः" इति।

धर्म, अर्थ, कामाऽऽख्ये अस्मत्पुरुषार्थानां त्रिवर्गे 'धर्मः' आद्यं स्थानमलङ्करोति। आद्यमेनं धर्मं अर्थकामौ यदा अभिभवतः, अर्थात् धर्मस्थानमाक्रमतः, तादृशाभ्यामेव अर्थकामाभ्यां अनर्थः आपतितो भवति। एतत्सन्निवेशं कालिदासकविः शकुन्तलादुष्यन्तयोः कामपरीतयोः प्रथमसम्मेलने प्रदर्शयामास। अत एव आसक्त्या केवलं अर्थकामपुरुषार्थयोः सेवनं धर्मदृष्ट्या दूषितमेव भवति। अनेनैव कारणेन कविकुलगुरुः स्वदिलीपपात्रचित्रणमेवंरीत्या कृतवान् यथा-

'जुगोपाऽऽत्मानमत्रस्तः भेजे धर्ममनातुरः।
अगृध्नुराददे सोऽर्थमसक्तस्सुखमन्वभूत्॥'

अनेन वर्णनेन 'धर्मार्थकामास्सममेव सेव्याः' इति धर्मानुशासनं कविना स्वकाव्यपात्रवृत्तिवर्णनमुखेन पालितमेव।

एवं कवेरस्य काव्येषु धर्मप्रबोधरीतिः लेखेऽत्र संग्रहेण प्रदर्श्यते। "भ्रातृमत्येव कन्या परिणेतव्या" इति अस्मद्वैवाहिको धर्मः। एतद्धर्मपालनायैव कविरेषः गिरिजापरिणयात् प्राक् मैनाकजन्मवर्णनं कृतवान्।

एवं नूत्नवधूवरयोः विवाहदिवसात् प्रभृति त्रिरात्रपर्यन्तं तयोः ब्रह्मचर्यपालनं धर्मसूत्रैश्शासितमेवम् -

"त्रिरात्रमुभयोरधश्शय्या ब्रह्मचर्यं क्षारलवणवर्जनं च"

(आपस्तम्बगृह्यसूत्रम्)

अन्यच्च "वध्वाः मानववरः चतुर्थः पतिः" इति श्रुतौ संदर्शितं यथा-

'सोमः प्रथमो विविदे, गन्धर्वो विविद उत्तरः, तृतीयो अग्निष्टे पतिः, तुरीयस्ते मनुष्यजाः ॥" (एकाग्निकाण्डे)

एवं चतुर्थदिने एव चतुर्थस्य मानववरस्य नूत्नवध्वां भर्तृत्वधर्मः उदेष्यति । नतु त्रिरात्राऽभ्यन्तरे । अत एव नूत्नवधूवरयोः मध्ये त्रिरात्रं यावत् भारतीयाः गन्धर्मस्थापनं कुर्वन्ति । एवं श्रुतिस्मृति-सम्मतमेनं भारतीयधर्मं पालयन्नेव कविः ईश्वरस्य केलीगृहप्रवेशवर्णन-सन्दर्भे एवं वर्णितवान् ।

'....क्षितिविरचितशय्यं कौतुकाऽगारमागात्' (कु० सं० ७-९४)

अत एव कामशास्त्रेण एवं शासितम्—

"... त्रिदिनमिह न भिन्द्यात् ब्रह्मचर्यं न चास्याः हृदयमननुरुध्य स्वेच्छया नर्मकुर्यात्" इति ।

एवमेव एष कवीश्वरः दिव्येन ईश्वरपात्रेण सकालसन्ध्यां कारयन् 'अहरहस्सन्ध्यामुपासीत' इति धर्मशास्त्रशासनं पालितवान् । अपि च सन्ध्यायाः अवश्यानुष्ठेयत्वकारणं कविः ईश्वरमुखतः एवं बोधयति ।

"निर्मितेषु पितृषु स्वयंभुवा या तनुस्सुतनु ! पूर्वमुज्झिता ।
सेयमस्तमुदयं च सेव्यते तेन मानिनि! ममाऽत्र गौरवम् ॥"

(कु० सं० ८-५२)

(स्वां विहाय गमनेन कुपितां शर्वाणीं ईशः एवं कथयति)

अनेन वर्णनेन कविः भविष्यपुराणोक्तं सन्ध्याचरणप्रयोजनं एवं स्मारयति ।

"पितामहः पितॄन् सृष्ट्वा मूर्तिं तामुत्ससर्ज ह ।
सा प्रातस्सायमागत्य सन्ध्यारूपेण सेव्यते ॥

एतां सन्ध्यां यतात्मानो ये तु दीर्घमुपासते ।
दीर्घायुषो भविष्यन्ति नीरुजः पाण्डुनन्दन ॥"

एवं ब्रह्मस्वरूपिणी सन्ध्या सकाले उपास्यमाना सती तदुपासकानां ब्रह्मज्ञानप्रदा, सर्वाभ्युदयसन्धायिनी च भविष्यतीति कविरत्र सूचितवान् । एवमेव ईश्वरस्य कृते गिरिजाकन्यकावरणाऽर्थं हिमवन्तं प्रति गच्छताम्, मध्येमार्गे सन्ध्याऽनुष्ठानं कुर्वतां सप्तर्षीणां सन्ध्याचरणरीतिमत्र कविरेवं प्रदर्शयति ।

"पार्ष्णिमुक्तवसुधाः तपस्विनः पावनाम्बुरचिताञ्जलिक्रियाः ।
ब्रह्मगूढमभिसन्ध्य मादृताः शुद्धये विधिविदो गृणन्त्यमी ॥"

(कु० सं० ८-४७)

सायंसन्ध्याविधौ अर्घ्यप्रदानसमये उपासकः स्वपादयोः पार्ष्णिभागौ (आन्ध्रभाषायां 'कालिमडमलु') उद्धृत्य अर्घ्यं दत्तव्यम् ।" इति वर्णनेन कविः एतद्विधिवाक्यं स्मारयति ।

"गोशृङ्गमात्रमुद्धृत्य मुक्तपार्ष्णिः क्षिपेज्जलम्" इति ।

किंच कालिदासीये 'विधिविदः' इति पदेन कविः "ज्ञात्वा कर्माणि कुर्वीत" इति विधिं सूचयति । एवमेव कविरत्र 'अभिवन्द्यं' इतिपदेन "जपन्नासीत गायत्रीं प्रत्यगातारकोदयात्" इति विधिं, 'शुद्धये' इति पदेन अर्थज्ञानपूर्वकं आचरितमेव सत्कर्म मानवानां चित्त-शुद्धये, क्रमशः मोक्षाय च कारणं भवतीति व्यंग्यभंग्याऽत्र उपदिष्टवान् । एवम्-

वसिष्ठर्षिः दिलीपं प्रति तत्सन्ताननिरोधकारणं कथयन्-

"धर्मलोपभयाद्राज्ञीमृतुस्नातामनुस्मरन् ।
प्रदक्षिणक्रियार्हायां तस्यां त्वं साधुनाऽऽचरः ॥" (रघुवंशे १-७६)

ऋतुस्नातया स्वभार्यया सह सम्मेलनं भर्तुः धर्मशास्त्रविहितो धर्मः । यथा-

"ऋतुकालाऽभिगामी स्यात् स्वदारनिरतस्सदा"

(मनुधर्मशास्त्रम्)

किंच ऋतुस्नातां भार्यां यो भर्ता न अभिगच्छति, तद्भर्तुः प्रत्यवाय एवंविध इति पराशरस्मृतौ एवं कथितम् ।

"ऋतुस्नातां तु यो भार्यां स्वस्थस्सन् नाऽधिगच्छति ।
बालगोघ्नाऽपराधेन युज्यते नाऽत्र संशयः ॥"

प्रस्तुते स्वर्गात् प्रतिनिवृत्य स्वभवनं गच्छन् दिलीपः उक्त-रीत्या ऋतुस्नातां स्वभार्यां अननुगमने धर्मलोपभयात् तां भावयन् मार्गे स्थितां कामधेनुं प्रदक्षिणक्रियया न सत्कृतवान् । एवं तदव-

धीरणया कुपिता सा अनपत्यतारूपं शापं राज्ञे दत्तवती । अत्र स्वधर्माऽऽचरणाय राज्ञा शापोऽपि स्वीकृत इति कालिदासहृदयम् ।

इतः परं द्वित्रान् धर्मान् प्रदर्श्य विरमामि ।

रघोः धनुर्वेदाभ्यसनं वर्णयन् कविः–

"त्वचं समेध्यां परिधाय रौरवीम्
अशिक्षिताऽस्त्रं गुरुरेव मन्त्रवित् ॥" (रघु० ३-३१)

'अजिनोत्तरीयो हि दीर्घायुर्भवति' इति सूक्त्यर्थं अत्र स्मारयन् चिरकालादनुष्ठीयमानं भारतीयसम्प्रदायमेनं अवश्याचरणीयत्वेन कविरत्र प्रकाशयामास । एवम् –

"स द्वितीयो दिलीपः, अरुन्धत्या अन्वासितं वसिष्ठर्षिं तदनुष्ठानाऽनन्तरमेव ददर्श" इति कथयन् कविः सूक्त्यर्थमेनं पुपोष । "जपं होमं च कुर्वाणो नाऽभिवाद्यो द्विजो भवेत्" एवमेव "परिणयाऽनन्तरं ईश्वरः श्वशुराय हिमवते वन्दनमकरोत्" इति वर्णयन् –

"ऋत्विक् पितृव्यश्वशुरमातुलानां यवीयसाम् ।
प्रवयाः प्रथमं कुर्यात् प्रत्युत्थायाऽभिवादनम् ॥"

इत्येवंविधं भारतीयसम्प्रदायरूपं धर्मं प्रकाशयामास कविः ।

"यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः ।..." इति गीतासूक्त्या यदि साक्षादीश्वर एव एतादृशधर्मान् पालयति । इतरेऽपि बद्धाऽऽदरास्सन्तः धर्म्याणि कर्माणि आचरन्ति । अतस्सिद्धपुरुषाः लोकसंग्रहार्थमेव कर्म आचरन्तीति अत्र ज्ञापितं कविना । एतत् प्रयोजनसाधनाऽर्थमेव कालिदासः स्वरघुवंशमहाकाव्य गोदानव्रतं, (३-३) वानप्रस्थ-

धर्मचर्यं, (३-७०) एवं इतरेष्वपि स्वकाव्येषु अवकाशं प्रकल्प्य विविधान्-नित्यव्यवहारे सर्वैः अनुसर्तव्यान्-धर्मविशेषान् वर्णयित्वा जनतामेवं प्रबोधितवान् यत्, कर्मप्रधाने भारते देशे जायमानः सर्वोऽपि मानवः स्वविहितसत्कर्माऽऽचरणेन चित्तशुद्धिदायकेन सर्वविधं जीविताऽभ्युदयं विन्दति। जनकादयोऽपि सत्कर्माचरणेन क्रमशः जीवन्मुक्ता आसन्। एवं भवन्तोऽपि यदि जीवितचारितार्थ्यं प्राप्तु-कामाः, स्वस्वधर्मं परिपालयत। यतः 'धर्मो रक्षति रक्षितः' 'सत्कर्माचरणं' नाम, फलापेक्षाराहित्येन (निस्संगत्वेन) कर्माचरणम्। एतादृशेनैव कर्माऽऽचरणेन मानवानां चित्तशुद्धिः चित्तशान्तिश्च सम्पत्स्यते' इति।

एवं सुललितसुमनोहरसुन्दररीत्या विविधविषयान्-मानवजीविता-ऽभ्युदयकरान्-स्वकाव्यमुखेन अद्भुतं यथा वर्णयित्वा कालिदासः विश्वश्रेयस्सम्पादनविषये स्वमहाकाव्यानि उत्तमसाधनान्यकरोत्। अतएव 'कालिदासकाव्यगतं विशिष्टभावालङ्कारगुणरीतिरसध्वन्यादिरूपं सौरभं विश्वमखिलं व्याप्य सर्वेषां सर्वेन्द्रियसन्तृप्तिं करोत्येव। अतः-

"....कान्तासम्मितया यया सरसतामापाद्य काव्यश्रिया,
कर्तव्ये कुतुकी बुधो विरचितः तस्यै स्पृहां कुर्महे ॥'

'सर्वस्य सद्भावनाऽस्तु, विश्वस्य कल्याणमस्तु।

श्रीगुरुदेवाऽर्पणमस्तु।

